वर्षम् 73
अङ्कः -11
भाद्रपदमासः
विक्रमाब्दः 2080
युगाब्दः 5125
सितम्बर, 2023

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



# विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | ऋतुकाव्यम् | कविरश्मि-श्रीव्रजकिशोरत्रिपाठी | ६ |
| ३ | श्रुत-बोध-कथा | डॉ. नारायणकाङ्करः | ९ |
| ४ | मा वीरा विस्मृता भूवन् | डॉ. महेशचन्द्रशर्मा 'गौतमः' | १० |
| ५ | पराम्बाकृपाकाङ्क्षा | डॉ. रामनारायणझाः | १३ |
| ६ | सङ्घमहाकाव्यम् | डॉ. सीताराम दोतोलिया | १४ |
| ७ | भाषाद्वयमिति प्रसङ्गे संस्कृतस्य ....... | डॉ.रजनीशकुमारबारहठः | १६ |
| ८ | पाठक-प्रतिक्रिया | डॉ.सत्यव्रतवर्मा | १९ |
| ९ | नाटके लोकजीवनम् | अर्चना आर्यः | २० |
| १० | अपवादशास्त्रस्य परिभाषात्वम् | नरेशसिंहः | २३ |
| ११ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २७ |
| १२ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २९ |
| १३ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |



## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

दूरभाषः 0141-2379014, मो. 9799011085

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठम् रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदाससमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रोफेसर बनवारीलालगौडः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

केन्द्रीय संस्कृत विश्वविद्यालय, शिक्षा मंत्रालय, भारत सरकार के अधीन के द्वारा संस्कृत पुस्तकों के प्रकाशनार्थ वित्तीय सहायता की योजना के तहत प्रदत्त वित्तीय सहायता से प्रकाशित है।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 73 अङ्कः -11
भाद्रपदमासः
विक्रमाब्दः 2080
युगाब्दः 5125
सितम्बर, 2023

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# चन्द्रस्य दक्षिणे ध्रौव्ये श्रियं बिभर्ति भारतम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

अगस्त-मासस्य त्रयोविंशतिदिनाङ्के बुधवासरेऽपराह्णे 05.44 वादने चन्द्रयानम् (3) उत्तरणं समारभ्य 06.02 वादने चन्द्रमसो दक्षिण ध्रुवतले साफल्येन अवातरत् चन्द्रोपरि त्रिरङ्गध्वजञ्चाधूनोद् इति महान् प्रमोदावसरो भारतीयानाम्। अभिनन्दामहे 'इसरो' वैज्ञानिकान्। 14.07.2023 दिनाङ्के आन्ध्रप्रदेशे श्रीहरिकोटा-स्थानस्य के.सतीशधवन-अन्तरिक्ष-केन्द्राद् उड्डीयमानमिदं चन्द्रयानम् (3) एकचत्वारिंशद्दिनेषु स्वलक्ष्यसिद्धिम् अवाप्नोत्। चन्द्रमसो दक्षिणध्रुवतलेऽवतरणानन्तरमिदं चन्द्रयानम् अब्रवीत्- **'भारत! लक्ष्यसिद्धिम् अहम् अध्यगच्छम्, त्वमपि'** इति। सहैवानेन चन्द्रस्य दक्षिणध्रुवतले जगत्यस्मिन् **सर्वप्रथमः** साक्षिकर्ता सञ्जायमानो भारतदेशो विश्वस्यान्तरिक्षमहाशक्तिष्वन्यतमो जातः। तत्र चन्द्रोपरि सदेहं मानवो गन्तुं शक्नुयाद्, वसतिस्तत्र भवेदिति भावि लक्ष्यम्। यतश्चेदं चन्द्रक्षेत्रं हिमजलराशीनां खनिजपदार्थानाञ्चाकरः। चन्द्रस्य सर्वोत्तमं महत्त्वपूर्णमिदं स्थानम्।

रूस-देशोऽपि 10.08.2023 दिनांके चन्द्रस्य दक्षिणध्रुवतले (South Pole) अवतर्तुं 'चन्द्रमिशन लूना-25' इत्यभिधं यानं प्रवर्तितवान्, तस्य लक्ष्यमासीद् भारतीय-चन्द्रयानात् (3) प्रागेव 21.08.2023 दिनांक एव लक्ष्यसिद्धिर्भवेदिति। दौर्भाग्याद् रूस-देशस्य तद् यानं 20.08.2023 दिनांक एव विनष्टम् इतोऽपीयं भारतीयचन्द्रयान-सिद्धिर्महत्तां भजते। भारतस्य **'विक्रम लैण्डर'** इति तु शनैः पर्वतलङ्घनम्' इत्याभाणकम् अनुकुर्वन् यथाकालं यथास्थानं चन्द्रोपरि सूर्योदयवेलायाम् अवातरत्। अनन्तरं पद्भिः स्थातुं शक्तात् 'Ramp' इत्यस्मात् 'प्रज्ञानरोवरः' बहिरागतो यश्चतुर्दशदिवस-पर्यन्तं नैकानि वैज्ञानिकपरीक्षणानि विधाय यथाकालं सूचयिष्यति।

इतः पूर्वं 2008 तम ईशवीयाब्दे चन्द्रयानम्-1 तथा 2019 तमे वर्षे चन्द्रयानम्-2 कार्यमेतत् साधयितुं प्रावर्तेते परम् आंशिकवैफल्यात् साफल्यं नैव जातम्। 'चन्द्रयानम्-2' इत्यास्याग्रणी **'इसरो'** इत्यस्य पूर्वप्रमुखः श्री **'के.सिवन'** इत्यपि चन्द्रयान-तृतीयस्योत्तरणावतरणकाले साक्षित्वेन उपस्थित आसीत्।

चन्द्रयान-तृतीयस्याग्रणीरस्ति **'भारतीय-अन्तरिक्ष-अनुसन्धान-संगठन'** (Indian Space Research Organisation) इत्यस्य प्रमुखः- **पद्मश्रीः श्री एस.सोमनाथः**। स चायमत्यन्तं विनम्रो दानशीलः समय-परिरक्षकः 07.07.1963 दिनांके केरलप्रान्ते प्रादुरभूत्। 14.01.2022 तमे दिनांके स 'इसरो' इत्यस्य प्रमुखो जातः। अस्य मन्तव्यमस्ति यद् वेदेभ्योऽन्तरिक्षसिद्धान्ताः समवाप्ताः। संस्कृतभाषा वैज्ञानिकविचारान् अग्रेसारयितुं समर्था। अपि च संगणकयन्त्रे प्रतिष्ठातुम्, कृत्रिम-बुद्धिकौशलम् (Artificial Intelligence) समधिगन्तुं संस्कृतभाषा सर्वोत्तमेति।

**अवधेयम्-** अन्तरिक्षे भारतस्य सफलतायाः संस्थापक आसीत् महान् वैज्ञानिको **विक्रमः साराभाई**। स एव Indian Space Research

Organisation (इसरो) इत्यस्य जनक आसीत्। अस्येतिवृत्तमित्थं ज्ञेयम्- 1964 तम ईशवीयाब्दे जापानदेशे 'टोक्यो ऑलम्पिक' इति आयोज्यमान आसीत्। अमेरिकादेशस्तदानीं 'सिनकॉम-3' इति नाम्ना संचारोपग्रहम् अन्तरिक्षे प्रेषितवान्। उच्च-तकनीकसाहाय्येन भुवोऽन्तरिक्षस्य संचारोपग्रहेण सम्पर्कं साधयित्वा 'टोक्यो ऑलम्पिक' इत्यस्य साक्षात्प्रसारणं जगति प्रादर्शयत्।

**विक्रम-साराभाई** अनया घटनया अत्यन्तं प्रभावितोऽभवत्। कालेऽस्मिन् रूसदेशोऽपि 'स्पूतनिक-1' इति नाम्ना कृत्रिमं पृथ्वी-उपग्रहं प्रावर्तयत्।

वीक्ष्यैतत् साराभाई नैजं भारतीयम् अन्तरिक्ष-कार्यक्रमं सफलयितुं भारतसर्वकारम् आश्वस्तम् अकरोत्। सर्वकारस्याभिमतं प्राप्य Indian National Space Committee for Space Research इत्यस्य संघटनं विहितम्, तदेव 1969 तम ईशवीयाब्दे Indian Space Research Organisation (इसरो) इति नाम्ना प्रसिद्धिमवाप।

कार्यक्रमस्यास्य रूपरेखायां पूर्वराष्ट्रपतेः **ए.पी.जे. अब्दुल कलाम** महोदयस्य सक्रिय भूमिकाऽऽसीत्। 2003 वर्षे सोऽकथयत्- **'एकस्मिन् दिवसे भारतदेशः सफलो भविता। यदि वयं चन्द्रं** परितः परिभ्रमणे शक्तास्तर्हि चन्द्रतलेऽवतर्तुमपि शक्ता भवितास्म।'

**इदमप्यैतिह्यम्**- यद्यपि 1957 तमे वर्षे सोवियतसंघः प्रथमं कृत्रिमम् उपग्रहं 'स्पूतनिक' इत्यभिधं चन्द्रोपरि प्रेषितवान्। स एव 1966 तमे वर्षे 'लूना-9' इत्यभिधं चन्द्रोपरि अवतारितवान्। चन्द्रतलस्य प्रथमं चित्रमप्यनेनैव प्रेषितम्। तथाप्यग्रेसरोऽमेरिकाऽभवत्। 1968 तमे वर्षे अपोलो-8 इत्यभियानेन मानवसहितः 'स्पेस क्राफ्ट' चन्द्रकक्षां परितः परिभ्रमन् न्यवर्तत। अपोलो-11 चन्द्रतलेऽवतरणे सफलोऽभूत्। अमेरिकादेशीय एस्ट्रोनोट **नील आर्मस्ट्रांगः** 20.07.1969 दिनांके चन्द्रतलप्रापकः **प्रथमो** जनः।

परमेतद् **अविस्मरणीयं** यच्चन्द्रस्य दक्षिणध्रुव-तले इदानीं यावन्न कस्यापि देशस्योपग्रहोपि गन्तुं समर्थोऽभूत्, मानवस्य तु का कथा। **भारतदेशस्य चन्द्रयान-तृतीयमेव प्रथममित्यस्माकं गौरवम्।**

23.08.2023 दिनांके बुधवासरे साफल्येन चन्द्रयानस्य दक्षिणध्रुवतलेऽवतरणसमकालमेव इसरोप्रमुखः श्री एस.सोमनाथो दक्षिणाफ्रीकादेशस्य जोहान्सबर्गस्थाने ब्रिक्स-सम्मेलने समुपस्थितं भारतस्य प्रधानमन्त्रिणं श्री **नरेन्द्रमोदी**-महाभागं सूचितवान् **'भारतमधुना चन्द्रोपरि'** इत्यादि। त्वरितमेव त्रिरंगध्वजं दोधूयमानो नरेन्द्रमोदी कथितवान् **'भारतस्य शंखनादक्षणोऽयम्'** इति। अस्माकं राष्ट्रपतिः माननीया **द्रौपदी मुर्मु**-महोदया वर्धापयन्ती अब्रवीत्- **'दिनमिदं वस्तुतो महत्त्वपूर्णम्। एतादृशी सुघटना जीवनवेलाया-मेकवारमेव संघटते'** इति। जयतु भारतम्। वन्देन मातरम्।'

**- सम्पादकः**

जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये संस्कृतविभागाध्यक्षचरः, जयपुरस्थ-जगद्गुरु-रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये व्याकरणपीठाध्यक्षचरश्च।, दूरभाषाङ्कः: 8386943655

# ऋतुकाव्यम्

( वर्षाखण्डम् )

❑ कविरश्मि-श्रीव्रजकिशोरत्रिपाठी

(१)

ज्येष्ठान्ते समये प्रभाऽतिदलिते भानोस्तटस्थे भुवः
शुष्के सर्वजलाशयेऽखिलदिशस्तापेन ह्लकम्पिते।
आकाशे परिराजते नवघनः कृष्णः कृपाकारकः
मन्ये गोपविलासिनीरससमं लोकाय तद्दास्यति।।

(२)

श्यामा पीनपयोधरा मृदुगतिर्झङ्कारनादान्विता
रम्या काममना विरोधरहिता तापप्रशान्तिप्रदा।
सर्वानन्दविधायिनी प्रियतमा विद्युत्प्रभा नर्तकी
सा वर्षातरुणी भुवं प्रविशति ध्यायन्ति तां पार्थिवाः।।

(३)

तां दृष्ट्वा तपनात्मजो नतशिरा भीतोऽतिवृद्धो यतो
नेयं मानुकरी प्रवृद्धचरितं किं त्यक्ष्यति त्रासिनी।
मन्ये मेऽतिबलं निहत्य सुतरां शान्तिं स्वयं नेष्यति
सैवं चिन्तयतो जलांशुकनतात् तस्यास्यमाचुम्बति।।

(४)

तल्लीलापरिदर्शनाच्च निखिलास्तृप्ता यदा वञ्चिता-
स्तापो राजमणिस्ततोपि कुबलः पृथ्व्यां पुनर्गर्जति।
तद्भावं सहते धरास्थसकलो नो कोऽपि भीतोऽधुना
तस्मात्स क्रमशो गतोऽतिसरलः सर्पो विदन्तो यथा।।

(५)

भानोर्भानुबलात् प्रतप्तसिकता गच्छन्ति वह्निद्युतिं
तेनोद्धतकलेवराः पथचरान् हा पीडयन्ति ध्रुवम्।
तत्राधावरणात् स्वयं हि सरला हीना भवन्ति द्रुतं
कारायां च खलप्रभोर्निगडनाद् भृत्यास्तदीया यथा।।

(६)

आषाढे घनगर्जिते वियति वै कादम्बिनी राजते
तस्या वक्षसि मौसुमीप्रचलनाद् वर्षा भवन्ति क्षणात्।
तां दृष्ट्वा बहुमोदितं शिखिकुलं पक्षैर्महन्नृत्यति
लोके साधुजनोऽपरस्य कुशलं दृष्ट्वा यथा नन्दति।।

(७)

मेघाच्छन्नदिनं कुवायुदिवसो घर्माढ्यघस्रः कदा
तीव्रोत्तापभयं कदा च भवति क्ष्मा वृष्टिभिः शीतला।
वर्षारम्भदिनेषु पङ्किलपथान् दृष्ट्वा विरक्ता जनाः
किन्तूत्तापपराजयेन सकला प्रायेण तोषं गताः।।

(८)

सा लोकस्य विरक्तिभावमधिकं ज्ञात्वाभवत् स्थूलिनी
मेघप्रोतयुता समग्रपृथिवीमाच्छाद्य संगर्जति।
तद्धारेण जगत् क्षणाच्छमयति प्रीतिं लभन्तेऽखिला
विद्युत्कान्तिनिभा धराधरतटे स्थित्वा पुनर्वर्षति।।

(९)

वज्राघातबलात्तदा क्षितितलं तीव्रं मुहुः कम्पते
तत्पातात्तरवो ज्वलन्ति पशवो लोका म्रियन्ते भुवि।
पृथ्वी क्वापि विदारिता नगपतिः शक्तोऽपि फालं गतः
सौधाः क्वापि विनाशभावकलिता यन्त्राणि दग्धानि च।।

(१०)

शैत्यासिक्तजना जलावृतधरां नृत्यन्ति दृष्ट्वा मुदा
गर्वाद् गर्जति मण्डूको दिशि दिशि क्रन्दन्ति गर्ताश्रयाः।
निःस्वो व्यस्ततया कुटीगतजलं बाह्यं करोति द्रुतं
किन्तूत्तापविमर्द्दितात् प्रमुदिताः सर्वे लभन्ते सुखम्।।

(११)

पृथ्वी नीलपटावृताऽतिरुचिरा घासांकुरापूरिताद्
वृक्षाः पल्लवितास्ततः कुसुमिताः केचित् सुरूपान्विताः।
वर्षास्वार्द्रितमेदिनी रसवती गर्भक्षमा जायते
तां दृष्ट्वा कृषकाः प्रमोदमनसा कर्षन्ति भूमिं हलैः।।

(१२)

वर्षार्द्रेण रजोवती वसुमती सर्वत्र तस्माच्छुभं
दोलाखेलरसेण सज्जितजनाः कुर्वन्ति तत्स्वागतम्।
ताम्बूलं फलपूपनूत्नवसनं सर्वप्रियं पर्वणि
सानन्दं परिपाल्यते प्रतिगृहं घस्रत्रयं सादरम्।।

(१३)

अस्यां मेऽपि **महौडिशाभुवि** रजः साडम्बरं पाल्यते
योषाः पर्वणि साग्रहं युवतयः क्रीडन्ति दोलोपरि।
क्रीडाप्रेमहृदः स्वरेण रसितं गायन्ति गीतं मुहु-
र्लोकाश्चात्र कवाडिखेलनिरता अन्यत्र केचिद् रताः।।

(१४)

मासान्ताद् रभते रजस्त्रिदिवसं घस्रे चतुर्थे ततो
भूलक्ष्म्यौरवगाहनाय सकला ब्राह्मे जनास्तत्पराः।
पूजास्नानविधिं विधाय नितरां बीजं गृहीत्वा गृहाद्
शस्याशाः कृषका वपन्ति ससुखं क्षेत्रे हलैस्तत्तदा।।

(१५)

वायुर्नास्ति न वा दिवाकरकरो मेघावृतं पुष्करं
दृष्ट्वेमां प्रकृतिं विरक्तहृदयाः स्वेदाक्तदेहा जनाः।
यस्माद् व्यस्तमनोरथाः किमपि नो कर्तुं भवन्ति त्वरै-
र्विद्युद्वातसहायको यदि भवेज्जीवः कथं तिष्ठति।।

(१६)

एवं कष्टदिने गते कतिपये मेघा घनत्वं गताः
सर्वस्यां दिशि तैर्निशा भवति किं नो दृश्यते भास्करः।
धारा वर्षति बाणपातसदृशा पृथ्वी क्षताक्ता ततो
वृष्टिः किन्तु न मुञ्चति स्वचरितं दृष्ट्वाऽतिव्यस्ता जनाः।।

(१७)

छत्रीभूतजनाः स्वयानगमना वर्षापवस्त्रान्विता
धाराघातबलादुपायरहिताः सिक्ता भवन्ति क्षणात्।
मेघो माघसमो विभाति समयः शीताद् वपुः कम्पते
मार्गे कोपि न गच्छति प्रचलते कार्यालयं वेतनी।।

(१८)

सर्वस्यां दिशि दृश्यते बहुजलं पूर्णा सरन्ती सरिद्
द्रव्याणि प्लवगा इवातिसलिले सर्वत्र यान्ति द्रुतम्।
नानाप्राणिगणा द्रुमाश्च जनता ग्रामा गृहं संपदो
वर्षाद्भिर्नितरां क्षणात् कवलिता निन्दन्ति देवं जनाः।।

(१९)

यानं याति जले यथा जलनिधौ पोतोऽतिवृष्ट्याः पथि
लोकाः किन्तु नदीं तरन्ति सभयं वाटो हि नो लक्ष्यते।
आयातः प्रलयो नु किं भवपटं किं वा समुद्रे गृहा
नोचेत् किं स्वगतिं प्रसार्य नितरां ग्रामे वहन्ति क्षणात्।।

(२०)

एवं सर्पपथा जलेन भरिता गन्तुं जना न क्षमा-
स्ते कुत्रापि विनष्टतां मलिनतां प्राप्ता जलस्रोतसा।
कस्मिन् बन्धुरता विखण्डितदशा गर्तोऽपि संदृश्यते
तद्भावादधिकं जलाप्लुतजनाः कष्टं सहन्ते गतौ।।

(२१)

वर्षापातजलं मृदा सह युतं प्राप्नोति रूपं बहु
तत्कालं कपिशं क्व वा प्रवहते श्वेतं च फेनान्वितम्।
रक्ताभं हरितं महाविलजलं पीतं विचित्रं क्व वा
मूर्खाः साधुरतात् तदीयचरितं धत्ते यथा भिन्नताम्।।

(२२)

वर्षाघातबलात् पथाः कलुषिता द्राक्कर्दमापूरिता
यानानां गमनाद् विशेषदलिता गन्तुं न तत्र क्षमाः।
सर्वे दुःखभराः प्रशासनबलं निन्दन्ति राज्याधिपं
नेतारं कुटिलं कुयानगमनं दैवं जलप्लावनम्।।

(२३)

ग्राम्याः शक्तमनोरथा निजगुणैः संमिल्य सर्वे ततः
संगृह्यापि विभिन्नवस्तुनिकरं प्रक्षिप्य तत्कर्दमे।
अश्मांशं सिकता निपात्य नितरां कुर्वन्ति रम्यं पथं
संहत्या भुवि किं न सिध्यति सखे!
तस्माद् भजेमैकताम्।।

(२४)

वर्षाभिः कृषकाः प्रमोदहृदयाः क्षेत्रं चलन्ति द्रुतं
नानाकर्मविधिं विधाय नितरां कर्षन्ति यानैर्हलैः।
नार्यः कण्ठरवैस्ततः सुमधुरैः संपूज्य भूमातरं
धान्याद्यंकुररोपणे कृतधियो पश्यन्ति नो तद्भयम्।।

(२५)

धाराश्रावणमासके प्रतिदिनं क्षेत्रं जनैः पूरितं
वृष्टिस्तत्र न बाधते हितकरी नानाङ्कुरारोपणे।
तेषामुन्नतिदर्शनेन कृषका लोका महानन्दिता
नूनं दास्यति नो धनं वसुमती शस्यं स्वयं भास्यति।।

(२६)

नीलाभा च वसुन्धरा दिशि दिशि ज्याभाम्बरैः सज्जिता
पीतारक्तसितादिपुष्पभरिता नारीव शोभावती।
तद्गीतं भ्रमरस्वनं गुणगुणु श्रुत्वा मनस्तृप्यति
किं सा गीतमयी स्वकण्ठमधुरैर्मोग्धुं जनानिच्छति।।

(२७)

नानाशस्यविभूषिता वसुमती वृष्टिर्मनोहारिणी
वज्रालेपयुतात् क्वचिच्च सुपथान् वृष्टिर्हि नो बाधते।
प्रौढाः पूर्णजलाशया च तटिनी व्याप्तोदरी वारिणा
सेवानन्दविधायिनी बहुधनैर्नारी यथा मोदते।।

(२८)

शैत्यश्रावणमारुतः प्रवहते मन्दं च मन्दं मुहु-
र्वर्षास्वल्पपरवैर्मनो मनसिजः किं किं करोति द्रुतम्।
कापीच्छा बहु वर्द्धते विरहिणां वृद्धो यविष्ठायते
सूर्योत्तापबलाद् बहु प्रतपते कन्दर्पदर्पानलः।।

(२९)

मेघान् दूतवरान् विलोक्य परितो व्यस्ता युवानः क्षणाद्
श्रुत्वा तद्वचनं हरारिदलिता इच्छन्ति सर्वे गृहम्।
दूरस्था निजकार्यभारगुरुतां त्यक्त्वा स्वग्रामोन्मुखाः
के रेलेन च लोकयानसहिता प्रायान्ति खेनापि के।।

(३०)

यूनीयं मुनिमानसातिदलिनी वृद्धप्रमोदायनी
लावण्यप्रतिमा रतिर्नु भगिनी तस्याश्च वा नन्दिनी।
तारुण्योद्धतकामिनी भ्रमति किं शून्येऽतिवर्षायने
कस्य च्छेत्स्यति जीवनं कुचरुचा किं वा कटाक्षैः शरैः।।

(३१)

स्वार्थान्धौ निजवृद्धये परहृदो यौ दारणे तत्परौ
निर्लज्जौ वसनान्वितौ विचलतः किं हेतुना पामरौ।
बालाहृत्परिदारणात् किमु परं यूनो हृदो दारणे
नृत्यन्तौ ननु काललोचनयुतौ बन्धो! सतर्को भव।।

(३२)

नव्योढा श्वशुरालये समुषितुं कामाहता नेच्छति
किं वास्मिन् गृहकार्यभारविवशा किं वा स्वतन्त्रार्थिनी।
तत्कान्तेऽपि निबोधिते विमुखिनी रुष्ट्वा गृहे क्रन्दति
तस्माद् याति गृहाद् विहाय सकलं पुत्रः स्वपत्न्या समम्।।

(३३)

मारार्त्ता गृवासिनी च युवती कार्यं समाप्य द्रुतं
किं ब्रूते बहु दूरजङ्गमधरा मित्रं सुवार्त्ताछलात्।
सा गुप्तेन निरन्तरं च नितरां ह्याख्याय नानाकथां
निर्लज्जाऽटति तेन हीनचरिता पित्रादयो दुःखिताः।।

(३४)

का वामा त्वरते जलाय तटिनीं व्याजात्प्रियाकाङ्क्षिणी
नो सायं त्विषते दिवाकरकरः कालं तदा नेक्षते।
कट्या कुम्भधरा त्रिकुम्भलसिता तं सा निधायावटौ
तत्स्थानं सरति प्रियेण कथितं क्रीडामनाः कामिनी।।

(३५)

मन्दामन्दविचारभावरहितः कामाहतःको युवा
कुप्रेम्णा युवतीसमं प्रकुरुते स्वेच्छाविहारं सदा।
दाम्पत्येन विभाति दूरनगरे त्यक्त्वा कुटुम्बं स्वकं
तत्कार्येण विनिन्दिता निजजना मन्ये कलेर्यन्त्रणा।।

(३६)

छात्रा नैव भजन्ति पाठमतुलं यज्ज्ञानसंवर्द्धकं
प्रेमालापप्रियाः कुबुद्धिभरिता गच्छन्ति मन्दं पथम्।
अज्ञानेन सृजन्ति निन्द्यघटनां धर्मादिहीनां ध्रुवं
तस्माद् दुष्यति सन्ततं जगदिदं मन्ये कलेर्यन्त्रणा।।

(३७)

सर्वस्मिन् तटिनीतटे जलघटौ दण्डेन स्कन्धावहा
दृश्यन्ते शिवसेवकाः पथि पथि प्रत्येकराज्येऽधिकाः।
बोल्बंशब्दमुखा विमुक्तचरणा भक्ताः सुनिष्ठापरा
वर्षासिक्तकलेवरा गतभया गच्छन्ति शैवालयम्।।

(३८)

पादाक्लान्तहता सुखादिरहिता निद्राविहीना पुनः
किन्तु श्रीपरमेश्वरस्य कृपया पद्भ्यां चलन्ति द्रुतम्।
शम्भौ कुम्भजलं प्रदाय ससुखं सोमे दिने श्रावणे
स्वेच्छापूरणमोदिता निजगृहं प्रायान्ति नत्वा हरम्।।

(३९)

वर्षतौ परिपाल्यते भगवतो यात्रा महास्यन्दने
या नाम्ना खलु गुण्डिचा क्षितितले सर्वप्रसिद्धा सदा।
तद्यात्रा खलु बाहुडापि नवमे घस्रे स्वनुष्ठीयतेऽ-
मावास्या भुवि चित्रिणी सुखकरी रम्या जनानन्दिनी।।

(४०)

आषाढान्तदिने भवे समजनि त्रैलोक्यजाड्यापहः
श्रीव्यासो मुनिपुङ्गवो गुरुगुरुर्द्वैपायनो ब्रह्मवित्।
नानातत्त्वकथां पुराणवचनैर्ज्ञानं ददौ यो मुदा
भक्त्या नौमि पराशरस्य तनयं तेनाऽखिलं मे गुरुम्।।

(४१)

अस्मिन् श्रावणपूर्णिमा प्रतिगृहं प्रीत्या जनैः पाल्यते
गोसेवाबलदेवपूजनमहो कुर्वन्ति रम्योत्सवम्।
भ्रातुर्मङ्गलकाङ्क्षिणी हि भगिनी स्नेहार्थिनी सादरं
रक्षाबन्धनमानसा भुजतटे बध्नाति सूत्रं महत्।।

(४२)

अस्मिन् पर्वणि संस्कृतस्य दिवसो देशे मुदा पाल्यते
तद्वाणीगुरुतां विचार्य विबुधा व्यासैर्यतन्ते सदा।
शिष्या यान्ति निजालयाद् गुरुकुलान् ख्यातानुपाकर्मणे
वेदज्ञमहामृतस्य ग्रहणात् तेषामघं नश्यति।।

इति

व्यासकवि-ध्यानसम्राड्-ज्ञानज्योतिः
कविरश्मि-श्रीव्रजकिशोरत्रिपाठि-विरचिते
ऋतुकाव्ये वर्षाखण्डं संपूर्णम्

- ब्रह्मपुरम्, ओडिसा
मो. ९८२८८७४६०१

श्रुत-बोध-कथा -

# चतुरः शृगालः

❑ स्व. कोविद-कुल-किङ्करः **डॉ. नारायणकाङ्करः**
राष्ट्रपति-सम्मानितः

एकस्मिन् वने एकः हस्ती मृतः आसीत्। तम् एकः शृगालः दृष्ट्वा अवदत्- 'अहम् इमं बहु-दिनानि यावत् खादिष्यामि। परन्तु अस्य चर्म बहु-कठोरम् अस्ति। पश्यामि, चित्रकः इह आगच्छेत्, सः यदा अस्य चर्म उच्छेत्स्यति तदा अस्य मांसं खादिष्यामि।'

शृगालः एवं विचारयन् आसीत् तदा तत्र एकः सिंहः समायातः। शृगालः सिंहम् अब्रवीत्- 'स्वामिन्! अहं भवदर्थे एव इमं हस्तिनं रक्षामि। इदानीम् इमं भक्षयतु।' सिंहः अवोचत्- 'नहि नहि अहं मृत-पशोः मांसं नैव भक्षयामि, त्वम् एव इमं भक्षय' एवं कथयित्वा सिंहः ततः निर्गतः।

सिंहे गते सति एकः व्याघ्रः आगच्छत्। तं ततः अपसारयितुं शृगालः तं व्याघ्रं कथितवान्- 'अरे! अद्य भवान् कुतः आपतितः? सिंहः इमं गजं निहत्य इमं रक्षितुं मां नियोज्य स्नानार्थं गतः अस्ति। यदि सः भवन्तं द्रक्ष्यसि, तर्हि भवन्तं मारयिष्यति।' शृगालस्य इमां वार्त्तां श्रुत्वा व्याघ्रः तत्क्षणं ततः पलायितः।

व्याघ्रे पलायिते सति यदा चित्रकः आगतः तदा तेन स्वकार्यं साधयितुम् इच्छुकः शृगालःचित्रकम् अवोचत्- 'आयातु आयातु। इमं हस्तिनं हत्वा किञ्चित्- समय-पूर्वम् एव सिंहः गतः अस्ति। सः यावत् न आयाति, तावत् उदर-पूरं भवान् इदं भक्षयतु, अहं यदा सूचयेयं, तदा द्रुतम् इतः भवान् पलायनं करोतु।'

चित्रकः यावत् चर्म विदार्य भक्षयितुं प्रवृत्तः, तावत् एव शृगालः चित्रकं सिंहस्य आगमनं सूचितवान्। अधुना चित्रकः स्व-प्राणान् रक्षितुकामः तत्कालं ततः पलायितः।

अधुना निःशङ्कः सन् शृगालः यथाहि हस्तिनं खादितुं प्रवृत्तः, तथाहि अन्यः एकः शृगालः तत्र आयातः। तम् अपि प्रथमः शृगालः मारयित्वा परलोके प्रेषितवान्। इदानीं सर्वथा अजात-शत्रुः सः शृगालः बहूनि दिनानि यावत् हस्तिनः मांसं भक्षयित्वा स्वीयां क्षुधां शमयामास इति।

**ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-**

भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम - **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या - 2139101912498
IFS Code - CNRB0002139

क्रमानुगतम् -

# मा वीरा विस्मृता भूवन्

## ( शौर्यगाथा )

❑ डॉ. महेशचन्द्रशर्मा 'गौतमः'
साहित्य-अकादम्या पुरस्कृतः

**यद्यप्यसाधारणपराक्रमसम्पन्ना अस्माकं योद्धारः सम्प्रत्यपि शत्रून् व्यपाकार्षुस्तथापि नैका बाधा अतिक्रम्य मार्गस्य निर्माणे व्यापृतमेतत्सैन्य-दलं दिनद्वयेन चिंगासमभ्ययासीत्। राणेमहोदयस्य नेतृत्व एतत्सैन्यदलं ततोऽग्रे राजौरीपर्यन्तं मार्गस्य निर्माणे व्यासक्तमभूत्। अपरतोऽस्माकमन्य-त्सैन्यदलं युद्धोपकरणयानानां टैङ्कानाञ्च क्रमणाय तवीनद्यां मार्गस्य निर्माणे व्यासक्तमवर्तिष्ट। अस्मिन् दुष्करे कार्ये कीदृशान् व्याघातान् कथं कथञ्चास्माकमेते वीराः सैनिका पर्यवास्थिषत न तत्सर्वमत्रोपवर्णयितुं शक्यते। अप्रैलमासस्य द्वादश्यां तिथौ दिवावसानं यावदेवास्माकं सैन्यदलं राजौरीमभ्ययासीत्। युद्धप्रवीणाः पराक्रमि-णोऽस्माकं सैनिका दुष्टानवस्कन्दिनो दण्डयित्वा व्यपाकार्षुरिति सत्यं परं तावत्पर्यन्तं शत्रवोऽ-सङ्ख्येयान् पुरुषान् महिला बालकांश्चावधिषुरिति याथार्थ्यं वर्तते निरतिशयं दुःखावहम्। यद्यप्यस्माकं वीराः शान्तिस्थापनायां सफला अभूवन् तथापि कश्मीरनरेशस्य निर्णये विलम्बोऽपूरणीयायाः क्षतेः प्रभवोऽभूदिति भूतार्थो निराकर्तुं न शक्यते। भारतस्य शासनं पराक्रमिणः सैनिकान् तेषां सवैलक्षण्यं शौर्य-प्रदर्शनायाससभाजत्। सेकण्डलेफ्टिनेण्टरामा-राघोबाराणेमहोदयाय भारतशासनं परमवीरचक्र-सम्मानं व्यशिश्रणत्।**

**सरलार्थः** यद्यपि असाधारण पराक्रम से सम्पन्न हमारे योद्धाओं ने अब भी शत्रुओं को भगा दिया तथापि अनेक बाधाओं को पार करके मार्ग के निर्माण में लगा हुआ यह सैन्य दल दो दिन में चिंगास पहुँचा। राणे महोदय के नेतृत्व में यह सेना की टुकड़ी उससे आगे राजौरी तक रास्ता बनाने में जुट गई। दूसरी ओर हमारी दूसरी सैन्य टुकड़ी बख्तरबन्द गाड़ियों और टैंकों के जाने के लिए तवी नदी पर रास्ता बनाने में लगी हुई थी। इस कठिन कार्य में किस प्रकार के विघ्नों का और कैसे-कैसे हमारे इन वीर सैनिकों ने मुकाबला किया वह यहाँ सूक्ष्मता के साथ वर्णन नहीं किया जा सकता। अप्रैल महीने की बारह तारीख़ को शाम तक ही हमारा सैन्यदल राजौरी पहुँचा। युद्ध में प्रवीण पराक्रमी हमारे सैनिकों ने दुष्ट आक्रमणकारियों को दण्ड देकर भगा दिया यह सत्य है परन्तु तब तक शत्रुओं ने अनगिनत पुरुषों, महिलाओं और बालकों को मार दिया था यह यथार्थ अत्यधिक दुःखदायक है। यद्यपि हमारे वीर शान्ति स्थापना में सफल हुए तथापि कश्मीर नरेश का निर्णय में विलम्ब अपूरणीय क्षति का कारण बना इस वास्तविकता को झुठलाया नहीं जा सकता। भारत सरकार ने पराक्रमी सैनिकों को उनके विलक्षण रूप में शौर्य प्रदर्शन के लिए सम्मानित किया। सेकण्ड लेफ्टिनेण्ट रामा राघोबा राणे महोदय को भारत सरकार ने परमवीरचक्र सम्मान प्रदान किया।

**कश्मीरस्य टिथवालभागे ११४८१ पादप्रमाणं समुच्छ्रितं वर्तते दारापरीक्षेत्रम्। गूढचारिणोऽसुसूचन् यदवस्कन्दिनः शत्रवस्तत्रैव**

क्वचित्रिभृता अस्थुः। आक्रान्तान् शत्रूनाक्रम्य तान् दारापरीतो व्यपाकरणस्याभियोज्यतावर्तिष्ट पीरूसिंहशेखावतमहाभागस्य। नैतदवर्तिष्ट भारतीय-सैनिकानां परिज्ञाने यच्छत्रवः खातकानि निर्माय तेषु प्रच्छन्नं स्थितास्तेषां सर्वान् कर्मोद्योगान् सूक्ष्मेक्षिकयाभ्यैक्षिषत। समीपमागतमात्रेषु भारतीयसैनिकेषु शत्रवो बन्दूकैर्मशीनगनैर्मोर्टारैश्च प्रहर्तुमारप्सत। अस्मिन् सम्परायेऽस्माकमेक-पञ्चाशत् सैनिका आत्मनो जीवनान्यहौषुः। पीरूसिंहशेखावतोऽपि परिक्षतोऽभूत्। एष वीर आत्मनो जीवनं शङ्कास्पदीकृत्य विद्युदिव तीव्रगत्या शत्रोः खातकस्य समीपं गत्वा कालक्षेपेणैव खातकस्थानशेषान् शत्रूनात्मनो मशीनगनस्य गोलिकानां लक्ष्याणि व्यधात्। किंकर्त्तव्यविमूढाः शत्रवः किञ्चिदवगच्छेयुस्ततः पूर्वमेवैष वीरस्तान् निष्प्राणान् व्यधात्। भयङ्करेऽस्मिन् संगरे शत्रून् संहरन्तोऽपि शेखावत- महाभागस्य सर्वे साहाय्य-कारिणो वीरा भारतभुवः सम्मानं रक्षन्त आत्मनः प्राणानहौषुः। केवलं शेखावतमहाभाग एव शत्रूणां पराजयं सुनिश्चितं कर्तुं जीवितोऽवर्तिष्ट। जर्जरितदेहोऽपि स गोलिकावर्षं पर्यवतिष्ठमानोऽन्यत् खातकं प्राप्य तत्र स्थितान् शत्रूननीनशत्। सम्प्रत्यप्येकस्मिन्नन्यस्मिन् खातके स्थिताः शत्रवो निरन्तरं प्राहार्षुः परं शेखावतमहाभागः संस्थितिं गृहीत्वा हथगोलां प्रक्षिप्य तान् सर्वान् समकालमेव कालकवलितान् व्यधात्। दौर्भाग्येण तदानीमेव, समकालमेव शत्रोर्मशीनगनान्निःसृतैका गोलिका-प्रतिमपराक्रमिणोऽस्य वीरस्य शिरोऽव्यात्सीत्। एवं सर्वान् शत्रून् संहृत्यैष वीरो मातृभुवो गौरवं वर्धयन्नात्मानमहौषीत्। भारतशासनं सर्वान् बलिदानिनो वीरान् दारापरीयुद्धसम्मानेनास-सभाजत्, अनितरसाधारणपराक्रमिणे पीरूसिंह-शेखावतमहाभागाय च स्वतन्त्रभारतस्य सर्वोच्चं परमवीरचक्रसम्मानं व्यशिश्रणत्।

**टिप्पणी:** संस्थितिं गृहीत्वा - पोजीशन लेकर, अव्यात्सीत् - बींध दिया, दारापरीयुद्धसम्मानः - बैटल ऑनर ऑफ दारापरी।

**सरलार्थ:** कश्मीर के टिथवाल सैक्टर में ११४८१ ऊँचा है दारापरी क्षेत्र। गुप्तचरों ने सूचना दी कि आक्रमणकारी शत्रु वहीं कहीं छिपे हुए हैं। आक्रमण करने वाले शत्रुओं पर हमला करके उन्हें दारापरी से भगाने की जिम्मेदारी पीरू सिंह शेखावत महोदय की थी। भारतीय सैनिकों को इस बात की जानकारी नहीं थी कि शत्रु खन्दकें बनाकर उनमें छिपकर बैठे उनकी सारी गतिविधियों को सूक्ष्म दृष्टि से देख रहे थे। भारतीय सैनिकों के पास आते ही शत्रुओं ने बन्दूकों, मशीनगनों और मोर्टारों से प्रहार करना आरम्भ कर दिया। इस युद्ध में हमारे इकावन सैनिकों ने अपने जीवन होम कर दिये। पीरू सिंह शेखावत भी ज़ख्मी हो गये। इस वीर ने अपने जीवन को दाँव पर लगाकर बिजली जैसी तेज़ गति से शत्रु की खन्दक के पास जाकर बिना समय गँवाये खन्दक में स्थित सभी शत्रुओं को अपनी मशीनगन की गोलियों का लक्ष्य बना दिया। किंकर्तव्यविमूढ़ शत्रु कुछ समझें इससे पहले ही इस वीर ने उन्हें निष्प्राण कर दिया। इस भयङ्कर युद्ध में शत्रुओं का संहार करते हुए भी शेखावत महोदय के सभी साथी वीरों ने भारत भूमि के सम्मान की रक्षा करते हुए अपने प्राणों को होम कर दिया। केवल शेखावत महोदय ही शत्रुओं की पराजय सुनिश्चित करने के लिए जीवित थे। जर्जर देह वाले भी उसने गोलियों की बौछार का सामना करते हुए दूसरी खन्दक के पास जाकर वहाँ स्थित शत्रुओं को नष्ट कर दिया। अब एक दूसरी खन्दक में बैठे शत्रु निरन्तर प्रहार कर रहे थे परन्तु

शेखावत महोदय ने पोजीशन लेकर हथगोला फेंककर उन सबको एक साथ ही काल का ग्रास बना दिया। दुर्भाग्य से उसी समय शत्रु की मशीनगन से निकली एक गोली ने अप्रतिम पराक्रमी इस वीर के सिर को बींध दिया। इस प्रकार सब शत्रुओं का संहार करके इस वीर ने मातृभूमि का गौरव बढ़ाते हुए अपने आप को होम कर दिया। भारत सरकार ने सभी बलिदानी वीरों को बैटल ऑनर ऑफ दारापरी सम्मान से सम्मानित किया और अनितरसाधारण पराक्रमी पीरू सिंह शेखावत महोदय को स्वतन्त्र भारत का सर्वोच्च परमवीरचक्र सम्मान प्रदान किया।

**१९४८ तमे ईसवीयसंवत्सरेऽक्तूबरमासस्य त्रयोदश्यां तिथौ पूर्वस्मिन् सम्पराये पराक्रमिभिर्भारतस्य सैन्यबलैरभिगृहीतानि क्षेत्राणि पुनर्जिघृक्षतः शत्रोः पाकिस्तानस्य सैन्यबलं टिथवालक्षेत्रस्य रीछमारगलीं पूर्ण-शक्त्याऽऽक्रमीत्। लांसनायकः करमसिंहस्तस्य सहयोगिनः सैनिकाश्च पराक्रमेण शत्रोराक्रमण-मल्पार्थं व्यधुः, परं दुर्दान्तः शत्रुः पुनर्भूयोऽपि प्राबल्येनावास्कान्त्सीत्। विशालं शत्रुसैन्यं पर्यवस्थातुं तत्र केवलं त्रयः सैनिका अवर्तिषत लांसनायककरमसिंहस्य साहाय्यकारिणः। निरन्तरं गोलिकावर्षेण भग्नानां शैलाग्राणां खण्डैश्चत्वार एव ते परिक्षता अजनिषत। शत्रुसैनिकानां प्राचुर्यान्न ते गोलिकाप्रहारैरपक्रम-यितुमशाकिषत, शत्रवश्च निरन्तरमुपासृपन्। करमसिंहः पृष्ठस्थादात्मनः शाणपुटान्निस्सार्यैकं हथगोलास्त्रं 'जो बोले सो निहाल सतसिरी अकाले' ति जयघोषेण सह शत्रुसमूहे प्राक्षैप्सीत्। हथगोलास्त्रस्यैष प्रहारो नैकेषां शत्रुसैनिकानां जीवनं कथाशेषमकार्षीदन्यांश्च तत्र स्थितान् सर्वान् व्यचीचलत्। नैकेषां परिक्षतानां पलायितुमक्षमाणां शत्रूणां चीत्कारैः रीछमारगलीक्षेत्रं क्षुब्धमजनि।**

**टिप्पणी:** जिघृक्षतः - अधिकार में लेने की इच्छा वाले (√ग्रह् सन् शतृ षष्ठी ए.व.), अवास्कान्त्सीत् - आक्रमण कर दिया (अव√स्कन्द्, लुङ्, प्र.पु.ए.व.).

**सरलार्थः** ईस्वी सन् १९४८ के अक्तूबर महीने की तेरह तारीख़ को पिछले युद्ध में भारत की पराक्रमी सेनाओं द्वारा अधिकार में लिए हुए क्षेत्रों को फिर से अधिकार में लेने की चाह रखने वाले शत्रु पाकिस्तान की सेना ने टिथवाल क्षेत्र की रीछमार गली पर पूरी शक्ति से आक्रमण कर दिया। लांसनायक करम सिंह और उसके सहायकों ने पराक्रम से शत्रु के आक्रमण को व्यर्थ कर दिया परन्तु दुर्दान्त शत्रु ने फिर से और भी प्रचण्ड रूप से आक्रमण कर दिया। विशाल शत्रु सेना का सामना करने के लिए वहाँ लांसनायक करम सिंह की सहायता करने वाले केवल तीन सैनिक थे। निरन्तर गोलियों के बरसने से टूटे हुए शैलशिखरों के टुकड़ों से वे चारों ही घायल हो गये थे। शत्रु के सैनिकों की अधिकता के कारण उन्हें गोलियाँ चलाकर नहीं भगाया जा सकता था और शत्रु निरन्तर पास आते जा रहे थे। करम सिंह ने पीठ पर लटकते अपने थैले से निकाल कर एक हथगोला 'जो बोले सो निहाल सतसिरी अकाल' जयघोष करते हुए शत्रुसमूह पर फेंक दिया। हथगोले के इस हमले ने शत्रुओं के जीवन को कथाशेष कर दिया और वहाँ स्थित दूसरों को विचलित कर दिया। अनेक घायल, भागने में असमर्थ शत्रुओं की चीखों से रीछमार गली का क्षेत्र हिल गया।

*क्रमशः ...*

-पटियाला, पञ्जाब, दूरभाषाङ्कः 9781124775

क्रमशः

# पराम्बाकृपाकाङ्क्षा

❑ डॉ. रामनारायणझाः

101

मातस्त्वं तनयं प्रदेहि यतिना संकाशितं दीप्रक-
मेवं राष्ट्रहिताय नैजमखिलं दद्यादधि या जीवनम्।
चेतोभिश्च सुभाषक प्रतिपलं ह्यव्यात्रु देशं निजं
तं यो योगिवदेव देशदयितं तेजस्विनं तार्किकम्।।

102

जानीयादरिमानसं त्वरितकं यो यावनीं जालिकां
भिद्यादेव सुशक्तिमानिव यतिस्तां विस्तृतां सर्वतः।
शक्त्या वाऽभयदश्श्रिया सुरगुरोर्बुद्ध्या च भासा निज-
या चाणक्यधियाऽभिया यदुपतेस्सातत्यसङ्कर्मणा।।

103

मातस्ते कृपयाऽमितप्रभमना ज्ञात्वा विषस्वैरिणी-
ग्रामं वाशु गुहोपमस्सुजनपास्संगूहमानारिकम्।
स्वैरं गुप्तचराकुलाहवकरव्रातव्रताक्रान्ततो-
गत्वा द्राग्धि भिनत्तिताननुपलं योगीव मे भो यतिः।।

104

लोभानां प्रतिपाशमाशु जनतायै योऽद्य भिन्दन्यति-
र्दोषाणामपि गर्वितात्ममनसामुच्चासनानामहो।
निष्पापाङ्कितफेनिलामलमनोभिर्दूषयन्पार्थिवा-
नां शीर्षण्यमहाकिरीटमणिरेवाभासमानो महान्।।

105

सञ्जातो जपतां हृदा यदुपतेर्गीतं शिवश्श्रेयसां
सर्वेषां परिसंहरेदयमिदं नूनं जगज्जागतम्।
यस्सर्वत्र सदाशिवः कथमिदं कुर्य्यादितश्चिन्तये-
देषा संस्कृतिरेव मे भुवितले शस्त्री च शास्त्री भवेत्।।

106

योगी तत्र सदोचितो हि विदधन्नूनञ्च कार्य्यं हरेः
प्रारब्धैः परिपूतसाधुपुरुषश्चोद्योगभाजाम्वरः।
हिन्दूस्थोत्थविशेषमंगलभुजां श्रेयो महापौरुषं
नूनं यो वितरन्विभासत इह प्रेक्ष्यं स कर्माद्भुतम्।।

107

बुद्धोऽसिंहनमाचरन्भगवतां पङ्क्तौ सदा संस्थितस्
तच्चासावनुवर्तयन्किल महावीरो हि सार्वभौमिकः।
वन्द्यौ स्तो भुवि सर्वतोऽपि यतिभिर्वै प्राणिभिः सर्वथा
नूनं कापुरुषा बभूवुरिहजास्तेनाद्य भो भारताः।।

108

अद्यावश्यकमस्ति हिंसनमिदं रक्षार्थमेवोचितं
स्वेषां राष्ट्रहिताय देशकृतिनां भो श्रेयसे स्वभुवाम्।
शत्रूणां जनघातिनां मम सखे! कोलाहलानां कृते
हिंसा चारुतरा सुशास्त्रविहिता हिंसात्मनां सर्वदा।।

क्रमशः

# सङ्घमहाकाव्यम्

(प्रथमः सर्गः)

❑ डॉ. सीताराम दोतोलिया

केशवमुद्घाटयितुं हि केशवं नमस्कृत्य।
केशवस्य महाकाव्यं निर्मामिभारताय।।१।।

नवगुणपुराणशततमे, खिस्ताब्दे वर्षे।
प्रथमायां तिथौ शुक्ले, पक्षे चैत्रमासे।।२।।

नागपुरे महानगरे, गुढीपाडवोत्सवे।
नरसिंहो जन्म लेभे, बलिरामस्य गृहे।।३।।

महामानवस्यात्मनः स्वागतञ्च कर्तुमिव।
सन्नद्धाद्य प्रकृतिरपि, सुपुत्रे स्त्रिह्यतीव।।४।।

पितरौ हि पुण्यशालिनौ रेवती बलिरामः।
तयोर्भवनमलञ्चकार सुबालकः केशवः।।५।।

आन्ध्रप्रदेशे राज्ये बोधनोपमण्डले।
निजामाबादमण्डले कंदवर्तीग्रामे।।६।।

गोदावरी वनजरा च सुतटिन्यो हरिद्रा।
पुण्यभूमौ वसन्तिस्म केशवस्य पूर्वजाः।।७।।

सीतारामः कनिष्ठो ज्येष्ठो महादेवः।
यस्य तिस्रश्च भगिन्यः पञ्च ते सहोदराः।।८।।

विद्यासु हि पारङ्गताः वेदाभ्यासनिरताः।
कंदवर्ती ग्रामात्ते, नागपुरं निर्गताः।।९।।

अध्ययनमध्यापनञ्च निगमानां प्रवचनम्।
अग्निहोत्रादिकार्यञ्च बलिरामेण हि कृतम्।।१०।।

गृहस्य संरक्षको, ज्येष्ठसुतो महादेवः।
शस्त्र-शास्त्र-शिक्षको, मल्लयुद्धपारङ्गतः।।११।।

नागपुरे प्लेगरोग सर्वत्र प्रससार।
पितरौ दिवङ्गतौ तेन, बाल्ये च केशवस्य।।१२।।

मनोबोधस्य श्लोकान् रामदासविरचितान्।
रामरक्षायाः स्तोत्रं केशवः संस्मृतवान्।।१३।।

महाभारतं सस्मार गीतां रामायणम्।
छत्रपतेः कथाञ्चकार केशवः कण्ठस्थम्।।१४।।

महाराज्ञः शासनस्य, महोत्सवाय दत्तम्।
स षष्ठितमवर्षीयस्य न जग्राह मोदकम्।।१५।।

नागपुरस्य सुख्याते सीताबडीदुर्गे।
केशवः सन्धिं कर्तुं सह मित्रैः प्रयेते।।१६।।

बङ्गालस्य विभाजनं प्रशासनं हि चकार।
भारते लोका नायकाः तद्विरोधञ्चक्रुः।।१७।।

नागपुरे महाराष्ट्रे बभूव जनाक्रोशः।
बङ्गभङ्गं विलोक्य प्रभावितः केशवः।।१८।।

बङ्गभङ्गस्य विरोधे कविबंकिमविरचितम्।
गीतं वन्दे मातरं जातञ्च जनगीतम्।।१९।।

रामपायली ग्रामे च, विजयदशम्यां तिथौ।
ग्राममर्यादामुलङ्घ्य, स राष्ट्रगीतं जगौ।।२०।।

नागपुरनगरस्थे, नीलसिटी विद्यालये।
वन्दे मातरञ्च स, जगौ निरीक्षकसम्मुखे।।२१।।

अधिकारिणो विरोधेऽपि, सहिष्णुः स बालकः।
क्षमां न ययाचे गीताय, निर्भयः स केशवः।।२२।।

विद्यालयं परित्यज्य, रामपायलीग्रामम्।
आगत्यापि न तत्याज, श्रेष्ठं क्रान्तिकार्यम्।।२३।।

नागपुराद् यवतमालं, समाजगाम नगरम्।
परांजपे महाशयस्य, पठितुं विद्यागृहम्।।२४।।

राष्ट्रियपाठशालायाः तपस्वी त्यागमयः।
संचालकः पराञ्जपे राष्ट्रियश्च शिक्षकः।।२५।।

परांजपेसहवासेन केशवस्य मानसम्।
राष्ट्रभक्तिप्रभावेन जातं हि सुगन्धितम्।।२६।।

आंग्लदमनचक्रेण तु, प्रथितो विद्यालयः।
परांजपेमहाशयस्य, शनैः शनैर्विनष्टः।।२७।।

यवतमालाच्च केशवः, ततः पूनां गतवान्।
तत्र शङ्कराचार्यस्य, शुभाशिषं प्राप्तवान्।।२८।।

तस्मादप्यमरावतीं, परीक्षार्थं गतवान्।
मेधावी परिश्रमी च साफल्यं प्राप्तवान्।।२९।।

उच्चपरीक्षामुत्तीर्य नागपुरञ्चागतः।
रावकेशवस्य विरुदं तदा प्राप केशवः।।३०।।

तेजस्वी निर्धनः, सुवक्ता हृष्टः पुष्टः।
स तथापि शश्राम, ध्येयं प्राप्तुं केशवः।।३१।।

कमण्डलुमात्रं च जलं मुष्टिमात्रं चणकम्।
उद्योगिनः सम्प्राप्य हि, न त्यजन्ति ध्येयम्।।३२।।

परिवारस्य पोषणाय, स्वात्मनो जीवनाय।
अध्यापनञ्चारेभे, लक्ष्यस्थः केशवः।।३३।।

संकुचितां वीथीं यदपि, लघुतरं स्वगृहञ्च।
अध्युवास रावस्तदपि, न तत्याज लक्ष्यञ्च।।३४।।

मन्दं मन्दं ध्येयन्तु साकारं बभूव हि।
उत्तुङ्गमुड्डयनमस्य रावस्य मानसे हि।।३५।।

हृदयस्थं लोकदुःखं, समीक्ष्य परतन्त्रताम्।
रावस्य मनो दुद्रोह, देशस्य च दुर्दशाम्।।३६।।

लोकमान्यस्य तिलकस्य, डाक्तरः प्रशंसकः।
बालकृष्णः शिवरामो, जातः पथप्रदर्शकः।।३७।।

आंग्लवैद्यकं शिक्षितुं, शिवरामस्य पत्रम्।
सम्प्राप्य रावो जगाम, कलकत्तापत्तनम्।।३८।।

बंगभूमिमतिपवित्रां, महाप्रभोः प्रियभुवम्।
गङ्गाजलपावनीं तां, पुण्यां प्रणमाम्यहम्।।३९।।

कलकत्तास्वामिनीं, पूज्यां कालीमातरम्।
महिषासुरमर्दिनीं पुनः पुनः प्रणमाम्यहम्।।४०।।

परमहंसं गुरुञ्च, पूज्यं श्रीरामकृष्णम्।
पुनः पुनर्नौम्यहं, शिष्यं विवेकानन्दम्।४१।।

भारतस्य पराधीनां, दयनीयाञ्च स्थितिम्।
विव्यथे रावकेशवो, दृष्ट्वा बङ्गभूमिम्।।४२।।

नेशनल मेडिकल नाम कलकतास्थं केन्द्रम्।
प्रविवेश रावकेशवः शिक्षितुञ्च वैद्यकम्।।४३।।

दृष्ट्वा स्वस्थं बलिष्ठं, केशवस्य शरीरम्।
सुपाचकः केशवाय च ददौ प्रियं भोजनम्।।४४।।

कलकत्तातो नागपुरं समागतः केशवः।
तस्मादपि यवतमालं निर्जगाम केशवः।।४५।।

तत्रस्थो जिलाधीशो, निकृष्टोऽहंकारी।
प्रणामं कर्तुं बबाधे, जनं स दुराचारी।।४६।।

अहंमानिनं तमांग्लं, विलोक्यापि केशवः।
नहि चकार नमस्कारं, प्रगल्भोऽपि विनीतः।।४७।।

परतन्त्रे बङ्गभागे, क्रान्तिकारिणः समम्।
आग्नेयास्त्रं शिक्षितुं निर्ममुर्गूढदलम्।।४८।।

गूढदलानां सदस्या जनमातुः समक्षम्।
प्रतिशुश्रुवुः केशवश्च रक्षितुं हि भारतम्।।४९।।

देशं स्वतन्त्रं कर्तुं, गौराङ्गेभ्यो भारतम्।
दत्वा प्राणानपि वयं, पास्यामः भारतम्।।५०।।

# भाषाद्वयमिति प्रसङ्गे संस्कृतस्य वर्तमाने प्रासंगिकता

❑ डॉ.रजनीशकुमारबारहठः

विश्वेऽस्मिन् सर्वे मानवाः भाषयैव स्वकीयविचाराणाम् आदानप्रदानं कुर्वन्ति। अधुना समग्रविश्वे सहस्राधिकाः भाषाः प्रयुज्यन्ते। न केवलं विश्वेऽपितु अस्माकं भारतदेशे अपि अनेकाः भाषाः प्रचलिताः सन्ति। भारतेऽपि प्रत्येकं प्रान्तस्य पृथग्पृथग्भाषाः सन्ति। एवमेव राजस्थानप्रान्तेऽपि बहुभाषाभाषिणः निवसन्ति।

व्यावहारिकरूपेण वैज्ञानिकरूपेण वयं पश्यामः यत् कस्यापि मानवस्य मनसि एका मूलभाषा स्वाभाविकरूपेण मूलरूपेण वा विकसति उद्भवति वा। तदाधारेणैव सः अन्यासां भाषाणां ज्ञानं व्यवहारं च प्राप्नोति। यथा वयं मूलरूपेण हिन्द्यामेव विचारादानप्रदानप्रक्रियां मस्तिष्के विचारयामः। यतोहि वयं जन्मना शिशुकालेन वा हिन्दीभाषामेव दृष्टवन्तः श्रुतवन्तः उक्तवन्तः, लिखितवन्तश्च। अतः प्रत्येकं पदार्थस्य विचारान् प्रति संकेतितार्थः हिन्द्यामेव जायतेऽस्माकं मनसि। यदा वयं किमपि पश्यामः तदा सर्वप्रथमं मस्तिष्कः मूलभाषायामेव विचारयति। यतो हि अस्माकं दीर्घाभ्यासः व्यवहारश्च मूलभाषायामेव भवति। अतः वयं हिन्दीभाषिणः सर्वप्रथमं संकेतितार्थं हिन्द्यामेव जानीमः। एवमेवान्यासां भाषाणां विषये ज्ञातव्यम्।

इतः परं वार्ता गच्छति द्वितीयभाषायाः। वस्तुतः अस्माकं मस्तिष्कः द्वितीयामथवान्यां भाषां (Secondary & other language) प्राथमिक-मूलभाषाधारेणैव (Primary & Basic Language) अवगच्छति। अनन्तरं पौनःपुन्येन तास्वन्यासु भाषास्वपि निष्णातः भवति। एवंप्रकारेण प्राथमिकभाषातिरिक्तं मानवः द्वितीयां तृतीयां वानेकां भाषां वक्तुमवगन्तुञ्च समर्थो भवति।

इदानीं वार्तां कुर्मः अस्माकं पाठ्यक्रमस्य। अस्माकं पाठ्यक्रमे द्विभाषा-त्रिभाषा-सूत्रं (formula) प्रचलितमस्ति। अस्मिन् सूत्रे बालकः स्वकीयमूलभाषातिरिक्तमन्यासां भाषाणामध्ययन-मवगमनञ्चापि करोति। यथा मूलभाषा हिन्दी अस्ति चेद् द्वितीया-तृतीया भाषारूपे आङ्ग्लभाषा, संस्कृतं, पंजाबी, गुजराती, सिन्धी, उर्दू अथवा अन्या काऽपि भाषा पठ्यते। परञ्चात्र ध्यातव्यं यथा पूर्वमेवोक्तं यत् अस्माकं मस्तिष्कः मूलभाषा-धारेणेवान्यासां भाषाणामवगमनं करोति। अतः अत्रावश्यकमिदं यत् का भाषा अस्माकं मूलभाषायाः सर्वाधिका निकटा समरूपा वा वर्तते। सा भाषा तावदेव सरलतयावगम्यते प्रयुज्यते वा। यतो हि वयं हिन्दीभाषासंदर्भे वार्तां कुर्वन्तः स्मः। अतः हिन्दीभाषाभाषिणां प्राथमिकमूलभाषा तु हिन्दी एवास्ति। परञ्च द्वितीया भाषा का स्यादिति प्रश्नः? आङ्ग्ली वा गुजराती वा सिन्धी वा पंजाबी वा अन्या काऽपि भाषा। वयं राजस्थानप्रान्तविशेषसन्दर्भे वदामश्चेद्वयं सर्वे प्राथमिककक्षातः हिन्दीमेव पठितवन्तः लिखितवन्तः दृष्टवन्तश्च। यद्यपि अस्माकं प्राकृतभाषा (Dialect) मारवाडी, मेवाड़ी, हाड़ौती, शेखावाटी, ढूंढाडि इत्यादि क्षेत्रविशेषसम्बद्धा भवितुमर्हति। किन्तु वयं लेखने पठने लिपिव्यवहारे

च हिन्दीमेव जानीमः। अतः अस्माकं पूर्णभाषा हिन्दी एव।

ततः द्वितीया भाषा का स्यात्? येषां बालकानां परिजनाः आर्थिकरूपेण समृद्धाः सन्ति किञ्चिदाङ्ग्लं च जानन्ति ते स्वकीयबालकान् आंग्लभाषां आंग्लमाध्यमेन वा पाठयन्ति। किन्तु येषां बालकानां परिवेशः साधारणः ग्रामीणश्च वर्तते तत्र परिजनाः प्रायः स्थानीयभाषायाः प्रयोगमेव कुर्वन्ति। तथा च व्यवहारे वयं तादृशरूपेण आङ्ग्लमपि न जानीमः यथा हिन्दीं जानीमः। वस्तुस्थितिरियमस्ति यत् प्रायः 70 प्रतिशतं जनाः परिवाराः स्थानीयभाषायाः हिन्दीभाषाया एव प्रयोगं कुर्वन्ति। एतस्यां स्थितौ बालकेन द्वितीया भाषा का चेया। सर्वे अभिभावकाः स्वकीयबालान् आङ्ग्लनिष्णातान् कर्तुमिच्छन्ति। नास्ति अत्र कोऽपि दोषः परञ्च सर्वेषां बालकानां परिवेशः सामर्थ्यं व्यावहारिक-स्थितिश्च तदनुकूला न भवति। अतः कदाचित् ते बलपूर्वकं समयानुगुणमाङ्ग्लादिकमाधुनिकं विषयं पठन्ति किन्तु तेषां परिणामः तथा सार्थकं न दृश्यते। अतः साधारणबालकैः अन्या का भाषा पठनीया चयनीया वा।

अधुना सर्वकारसेवायां सर्वाधिकपदानि अध्यापकपरीक्षायाः भवन्ति। स्वल्पास्तु छात्राः डॉक्टर-इंजीनीयर इत्यादिक्षेत्रेषु प्रवृत्ताः भवन्ति। किन्तु प्रायः साधारणाः छात्राः साधारणस्नातकपरीक्षां पठन्ति। स्नातकानन्तरं तेषां चिन्तनं वृत्त्युन्मुखं जायते। तदानीं तेषु बहवः अध्यापका भवितुमिच्छन्ति। अध्यापकपाठ्यक्रमे प्रायः भाषाद्वयं पठनीयं स्यात्। यतो हि शिक्षास्नातकपूर्वपरीक्षायां (P.T.E.T./P.S.S.T.) शिक्षास्तनाकपरीक्षायां (B.Ed.) अध्यापकपात्रतापूर्वपरीक्षायां (T.E.T./REET/CTET) पाठ्यक्रमे भाषाद्वयस्य चयनं क्रियते। एतस्यां स्थितौ छात्रः हिन्दीं तु झटत्येव स्वीकरोति परन्तु द्वितीयभाषाचयने किंकर्तव्यविमूढो भवति। यतो हि आङ्ग्लम् ऐच्छिकविषयः नासीत् अनिवार्यविषयरूपेणैव पठितम्। तदपि व्यवहारे नास्ति। गुजराती-पंजाबी-उर्दू-इत्यादय अपि नायान्ति। अनन्तरं संस्कृतविषये विचारयन्ति यत् संस्कृतं हिन्दी-सदृशं स्यात् अतः संस्कृतमेव द्वितीयभाषारूपे चयनं कुर्मः इति साधारणछात्रस्य चिन्तनं भवति। सः छात्रः विचारयति यत् संस्कृतं हिन्दीभाषायाः समाना एव स्यात्। संज्ञा-सर्वनाम-क्रिया-विशेषण-सन्धि-समास-कारकादयः। हिन्द्यामपि श्रुतवान् संस्कृतेऽपि तथैव स्यादिति श्रूयते। एवं प्रकारेण प्रायः छात्राः संस्कृतस्य चयनं द्वितीयभाषारूपेण कुर्वन्ति। सा एव संस्कृतं कदाचित् तैः तेषां च परिजनैः उपेक्षिता आसीत् इदानीं धनदानेन विविधकोचिंगसंस्थाने पठनीया सञ्जाता।

सैव संस्कृतभाषा किञ्चिदपि रुचिपूर्णतया पठिता स्यात् चेद् इदानीं सौकर्यं भवति। छात्राणाम् एषः विचारः यत् संस्कृतं हिन्दीसदृशं वर्तते। अत्र वस्तुस्थितिस्तु इयमस्ति यत् हिन्दी संस्कृतसदृशास्ति प्रत्युत संस्कृतनिःसृतैव। हिन्द्यां चतुर्विधशब्दाः भवन्ति तत्सम-तद्भव-देशज-विदेशी च। अत्र प्रायः शब्दाः तत्समतद्भवाः एव सन्ति। **तत्सम** इत्यस्याशयः तस्य समः समानो वा। अर्थात् संस्कृतस्य समानम्। सर्वे तत्समशब्दाः संस्कृतेन

यथावदङ्गीकृता:। **तद्भव** इत्यस्याशय: तेन तस्मात् वा भवा, भूता: संजाता: वा। तद्भवशब्दा: संस्कृतस्य शब्दै: विकारभूता: सन्ति। एवं स्पष्टमिदं हिन्दी तु संस्कृतनिस्सृसृता एव। सर्वे वर्णा:, लेखनसंकेता:, उच्चारणं, लिपिव्यवस्था, व्याकरणनियमाश्च संस्कृतेनैव नि:सृता:।

केवलं संश्लिष्टविश्लिष्टयोर्भेद:। **संस्कृतभाषा संश्लिष्टा** अस्ति। तत्र प्रकृति-प्रत्ययानां संयुज्यता समीपता भवति। **हिन्दी तु विश्लिष्टा** भाषा वर्तते यत्र प्रकृति-प्रत्ययानां निहितार्थ: वियुक्तरूपेण पृथक्तया दृश्यते। यथा संस्कृते 'राम:' हिन्द्यां 'राम ने', संस्कृते 'रामं' हिन्द्यां 'राम को', संस्कृते 'पठति' हिन्द्यां 'पढ़ता है', संस्कृते 'अपठत्' हिन्द्यां 'पढ़ता था' इत्यादय:। अत्र प्राय: केवलं निहितार्थस्य संयोजनं वियोजनमेव भेद:।

विवेचनेनायं स्पष्टं यत् संस्कृतहिन्दीमध्ये सर्वाधिकनिकटता सादृश्यम् एकरूपता च वर्तते। अत: अस्माभि: सर्वै: संस्कृतभाषा संरक्षणीया, संवर्धनीया च।

- **सहायकाचार्य:** (संस्कृत)
श्री कल्याण राजकीय कन्या महाविद्यालय:,
सीकरम्, मोबा. ६३५०६५८३३८



# पाठक-प्रतिक्रिया

❑ डॉ.सत्यव्रतवर्मा

भारत्या: श्रावणमासाङ्के ६ पृष्ठे प्रकाशितं कविपुङ्गवानाम् अभिराजराजेन्द्रमिश्रमहाभागानां गज़्ज़लिकात्रयं प्रपठ्य यो हर्षातिरेको जात: स वाचामगोचर:। कविवर्य्यस्य पदगुम्फपाटवं वाग्वैभवं कल्पनाप्रात्यग्र्यं काव्यकौशलं च काव्यत्रय एकपदे स्फुटतामगुरित्यहोभाग्यं सुरवाग्घेवाकिनाम्। तिस्रो गज़्ज़लिका: सुतरां रुच्या हृद्याश्च सन्ति परं द्वितीया (त्वमेवासि बन्धो!) विषयगौरवेण भावौज्ज्वल्येन चेतरे सुदूरम् अतिशेते। तत्र हि कविराजेन कस्यचित् सत्यव्रत इति नामधेयस्यनराधमस्य गुणनिकरस्य यत्कीर्त्तनं व्यधायि तद् हरिकीर्त्तनमप्यधरीकरोति। तत्र व्यवहृतैर्विशेषणपदैर् भावान्तरैश्चावदातं यत् गज़्ज़लिकाविषयभूत: सत्यव्रत: स्वर्यातेन विद्वत्तल्लजेन सत्यव्रतशास्त्रिणा सर्वात्मना साम्यं बिभर्ति। सत्यव्रतशास्त्री कारयित्र्या भावयित्र्या प्रतिभया देशे विदेशे चादभ्रं यशोऽविन्दत् भारतभुवं च गौरवं प्रापयत्। स च लोकेन भीष्मपितामह-सप्राणाकिंवदन्तीप्रभृतिभिरनन्यलभ्यैर्बिरुदैर् अभिनन्दित:। परं गालिबावतारभूतेन मिश्रमहाशयेन गज़्ज़लिकायां तस्य या गुणावलि: साभिनिवेशम् आविष्कृता, साम्प्रतिकै: कृताऽर्हणा तस्या: षोडशीं कलामपि न स्पृशति।

काव्यामृतपदारूढा अभिराजसदृक्षा: कवयितार एव नश्वरे देहभृति अजरां गुणसम्पदम् उद्भावयितुम् अलम्। सा सम्पच्च निगमागमपारीणानामपि बुद्धिवैभवमधरोत्तरं करोति। दिवंगत: शास्त्रिवर्य्य: सकलगुणशेवधिरभूदिति राजेन्द्रमहाभागानां राजदर्शनम्। के च तेनितरसाधारणा: पुण्या गुणा:? सायासमन्विष्टा नाना-भंगीभिश्च सव्याजं काव्ये वर्णितास् ते 'यमन्विष्यतो जीवनं मे व्यतीतम्' इत्याद्यारभ्य 'स्फुरत्कंकणं व्याघ्रहस्तात् प्रगृह्णन् स लुब्धोत्तमस्त्वं त्वमेवासि बन्धो' इत्यन्तं वर्णिता:।

ईदृशै: सुदुर्लभैर्गुणैर्मण्डिता विरला एव मनस्विनो भुवि दृष्टिपथमायान्ति। शास्त्रिवर्य्यस्तेष्वपि विरलतमोऽभूदिति मिश्रमहाशयस्तं दिग्दिगन्तेषु साभिनिवेशं मार्गयन् स्वजीवितमेवाहौषीत्। अहो तस्य बुद्धिवैलक्षण्यम्! बुद्धिमन्त एव एतादृशान् सर्वकलंकागारभूतान् अन्विष्यन्तो यथावसरं च तान् सभाजयन्तो लोकमंगलाय जीवनमर्पयन्ति। न चेदं दुरवगाहं यत् कविकृतमिदं चरित्रमण्डनं चरित्रखण्डनात् मनागपि न हीयते। जगति सुधिय एव मृतं प्रति कालुष्यनिर्भरं भावोच्छ्वासं कर्तुं प्रभवन्ति। इत्थं कुर्वाणास्ते आत्मदौर्बल्यमेव प्रख्यापयन्ति, न पौरुषम्। अप्रच्छन्नावस्कन्द एव शूराणां गौरवाय भवति। मृतेषु वाक्प्रहार: शस्त्रप्रहारो वा तमवलम्ब्येदृशो गज़्ज़लिका-प्रणयनव्यापारो वा सर्वात्मना निन्द्योऽशोभनीयश्च। इदं च शुश्रुम धीराणाम्- 'अद्रव्यपरिग्रहोऽपि विनेतुर्बुद्धिलाघवं प्रकाशयति'। दिवंगतस्यैतच् चरित्रहननं प्रकाश्य पत्रिकाऽपि वचनीयतां गता। क्षमायाचनयाऽनुशयं कृत्वैव साऽऽत्मानं पातकान्मोचयितुं शक्नोति। कविपातकं तु विधातैवापनेतुमलं स्यात्। किमधिकं विज्ञेषु।

अनुशय:।'त्रिधा कौलपत्येन योऽलङ्कृतोऽभूदि'ति गताङ्के (७१ अंके) भ्रामकवचनादनवधानताभवत्। पत्रिकापक्षतोऽनुशयं विज्ञापयति सविनयं सम्पादक:।

# नाटके लोकजीवनम्

❑ अर्चना आर्य:

## अभिज्ञानशाकुन्तलनाटके लोकजीवनम्

### ( 1 ) समाजे वर्णव्यवस्था -

अभिज्ञानशाकुन्तलस्याध्ययनेन प्रतीयते यत् तदात्वे देशे वर्णव्यवस्था सुदृढा आसीत्। समाज: ब्राह्मणक्षत्रियवैश्यशूद्राख्येषु चतुर्षु वर्णेषु विभक्त आसीत्। सर्वे जना: स्ववर्णानुसारेण वेदविहितानां वर्णधर्माणां पालनमकार्षु:।[1]

### ( 2 ) आश्रमव्यवस्था-

येन प्रकारेण चातुर्वर्ण्यं तदात्वे भारते प्रतिष्ठितमासीत् तेनैव प्रकारेण चत्वार आश्रमा अपि तदात्वे सुप्रतिष्ठता आसन्। ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासाख्या: चत्वार एवाश्रमा: सुप्रतिष्ठिता आसन् ।

### ( 3 ) समाजे ब्राह्मणानां तपस्विनां च समादर: -

समाजे ब्राह्मणानां तपस्विनां समादर आसीत्। आश्रमेषु गुरुकुलीयव्यवस्थया शिक्षा दीयतेस्म। महर्षि: कण्वोऽपि स्वस्य तपोवनस्य कुलपतिरासीत्। स्वाश्रमे दशसहस्त्रसंख्याकान् शिष्यान् निवास्य तेषामन्नपानादिना पालक: अध्यापयिता च कुलपतिशब्देनाभिधीयते स्म प्राचीने भारते। तथा चोक्तम् -

**मुनीनां दशसाहस्त्रं योन्नपानादिपोषणात्।**
**अध्यापयति विप्रर्षि: स वै कुलपति: स्मृत:**[2] **॥**

संसारोद्विग्ना: पुरुषा: तपोवनेषूषित्वा तपांसि चरन्ति स्म। तपोवनानां रक्षाऽपि राजैवाकरोत्। काले-काले तपोवनेषु गत्वा राजा तपस्विनाम् निर्विघ्नं तप अनामयञ्चापृच्छेत्। राजापि तपोवनेषु विनीतेन वेषेण गच्छतिस्म। तथा चाह राजा दुष्यन्तोऽपि सूतम्प्रति सूत! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि भवन्ति। तदिमानि तावद् गृह्यन्तामाभरणानि धनुश्च इत्युक्त्वा स: आश्रमाद्दूरमेव रथम् धनु: आभरणानि च त्यक्त्वाश्रमं प्रविवेश।

महर्षे: कण्वस्य सोमतीर्थं प्रति गमनं यदा तपस्विन: आगत्य निवेदयामासु: तदा राजा स्वयमेव तपोवनं गत्वा तपस्विनाम् यज्ञान् निर्विघ्नं सम्पादयति। राजा जानाति स्म यत् तपस्विनाम् तपस: षष्ठं भागम् राजा स्वयमेव लभते तेन च भवत्यक्षय्यं पुण्यम् । स: विदूषकम् वक्ति द्वितीयाऽङ्के अभिज्ञानशाकुन्तलस्य-

**यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तद्धनम्।**
**तप:षड्भागमक्षय्यं ददत्यारण्यका हि नो**[3] **॥**

### बहुविवाह प्रथा

अभिज्ञानशाकुन्तलस्य अध्ययनेन प्रतीयते यत् तदात्वे सति सामर्थ्ये बह्वीभि: स्त्रीभि: साकम् विवाह अनुचितो नासीत्। अत एव नि:संतानस्य मृतस्य धनवृद्धिनामकस्य वृत्तं श्रुत्वा राजा स्वयमेव वक्ति 'वेत्रवति! महाधनतया बहुपत्नीकेनानेन भवितव्यम् तदन्विष्यताम् काचिदापन्नसत्त्वास्य भार्या स्यात्'। अनसूया तृतीयाऽङ्के राजानं दुष्यन्तं वक्ति - 'बहुवल्लभा: खलु राजान: श्रूयन्ते।' अभिज्ञान-शाकुन्तलस्याध्ययनेनैव ज्ञायते यत् राज्ञो दुष्यन्तस्य तिस्त्र: पत्न्य: आसन् ।शकुन्तला, सानुमती, वसुमती

च। विदूषकस्य कथनानुसारेण अन्तःपुरस्थाः राज्ञ्यं विहाय शकुन्तलाम् प्रति दुष्यन्तस्याकर्षणम् पिण्डीखजूर्रभक्षणेनोद्विग्नस्य पुरुषस्य तिंतिणीम्प्रति लौल्यमिवास्ति।

**( 4 ) समाजे गान्धर्वविवाहस्यापि प्रथा प्रचलिताऽऽसीत् -**

मनुस्मृतिकर्त्रा वर्णितेषु अष्टप्रकारकेषु विवाहेषु ब्राह्मविवाहस्य गान्धर्वविवाहस्य प्रथा वर्णिता वर्तते।[4] राजा दुष्यन्तोऽपि शकुन्तलया साकम् गान्धर्वविवाहं करोति। सःशकुन्तलामाह-

**गान्धर्वेण विवाहेन बह्व्योऽथ मुनिकन्यकाः।**
**श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः[5]॥**

**( 5 ) निस्सन्ताने पुरुषे मृते सति तस्य सम्पूर्णा सम्पत्तिः राजकीया भवति स्म -**

अभिज्ञानशाकुन्तलस्य षष्ठाङ्के प्रतिपादितमस्ति यत् शकुन्तलाविरहव्याकुलो राजा दुष्यन्तः राज्यस्य कार्यभारममात्ये निर्वेश्य एकदा धर्मासनं नह्यध्यास्ते स्म। तदा अमात्यः निस्सन्तानमृतस्य धनवृद्धि-नामकस्य श्रेष्ठिनः सम्पूर्णां सम्पत्तिं राजकीयां घोषयित्वा, तस्य कार्यस्य सूचनां राज्ञः सविधे प्रेषयामास ।

**( 6 ) राज्यस्य केचन कर्मचारिण उत्कोचग्राहिण अप्यासन् -**

यद्यपि दुष्यन्तस्य सम्पूर्णा प्रजानुशासिताऽऽसीत्, कश्चनापि तत्रान्यायी नासीत् किन्तु एकस्मिन्नहनि राज्यकर्मचारिणः कस्यचन धीवरस्य सविधे यान्ति राज्ञो नामाङ्कितमङ्गुलीयकं लब्ध्वा, तम् प्रताडयन्ति। राजश्यालकश्चाङ्गुलीयकसहितं तमादाय राज्ञः सविधे याति। तद्दृष्ट्वा शकुन्तलां सस्मार राजा स्वपूर्वपरिणीताम् धर्मपत्नीम्। राजा तस्मै धीवराय कङ्कणं प्रयच्छति। यदा सः धीवरः तस्य कङ्कणस्यार्धं मूल्यं उत्कोचरूपेण राजश्यालकाय ददाति, तदा प्रसन्नः राजश्यालकः तेन धीवरेण साकम् मदिराम्पातुम् मदिरालयं याति ।

2. भर्तृहरिनिर्वेदनाटके लोकजीवनम्

**न द्यूते रमते मनोऽस्य मृगया-**
**कालोऽपि नालोक्यते।**
**विश्लिष्टस्य चिरान्मया च सुहृदां,**
**गोष्ठीरसः कीदृशः?**
**कस्याश्चित् तदराल-पक्ष्मल-दृशः**
**प्रायोऽनवद्याकृते-**
**रद्याहारि परेण चारिमचमत्**
**कारेण तस्यान्तरम्[6]॥**

अत्र लोकजीवने व्यासस्त्रीसुलभं ईर्ष्यावर्णनं अस्ति।

अत्र भानुमती भर्तृहरिविषये चिन्तयति यत्

अस्मत्प्राणवल्लभस्य राज्ञो भर्तृहरेर्मनो द्यूतेऽक्षक्रीडा-विशेषे न रमते। मृगया मृगरमणम् आखेटः 'आखेटो मृगया स्त्रियाम्' तस्याः कालोऽपि नालोक्यते। मया चिराद् बहुकालेन विश्लिष्टस्य वियुक्तस्य तस्य सुहृदां मित्राणां गोष्ठीरसः स्वाच्छन्द्यकथारसानुभवोऽपि कीदृशः? न कुतश्चित् कथञ्चिदपि दृष्टश्रुतपूर्वम्। तत् तस्माद् अनवद्याकृतेः अतिरमणीयस्वरूपायाः कस्याश्चिद् अरालपक्ष्मलदृशः सुन्दरकटाक्षवत्याः, 'अरालं कुटिलं भुग्नं वेल्लितं वक्रमि'त्यपि। परेण उत्कृष्टेन चारिम-चमत्कारेण चारुतातिशयेन तस्य राज्ञः, अन्तरेव आन्तरं मनः प्रायोऽहारि हृतमिति

सम्भावयामि।

**तावकीनैर्गुणैः प्रीतश्चिरक्रीत इव प्रिये।**
**यद्यस्म्यनुचरश्चिन्ता किं तापयति ते मनः**[7] **।।**

अत्र भर्तृहरिः भानुमतीं कथयति यत् -

तावकीनैस्त्वदीयैर्गुणैः सौन्दर्यसौकुमार्यवचनमाधुर्यादिभिः प्रीतः प्रसन्नः, सुबहुना कालेन, क्रीतः स्वायत्तीकृतो गृहदास इवानुचरः सेवको यदि अहमस्म्येव तदा चिन्ता इष्टसमीहाजनितो मनोविकारस्ते तव, मनः (कर्म), किं कस्मात् तापयति ? नास्ति किमपि सन्तापकारणम्।

**- शोधच्छात्रा, जगद्गुरु-रामानन्दाचार्य-**
**राजस्थान-संस्कृत-विश्वविद्यालय, जयपुरम्**
**दूरभाषः ९७८३८९१७३४**

संदर्भ :

1. अभिज्ञानशाकुन्तलम्, (हंसा प्रकाशन, जयपुर, 2010) पृ. सं. 215

2. तदेव, प्रथमांके, पृ. 72

3. तदेव, द्वितीयांके

4. मनुस्मृतिः (चौखम्भा संस्कृतसंस्थान, वाराणसी, वि.सं. 2058) पृ. सं. 200

5. तदेव, चतुर्थांके

6. भर्तृहरिनिर्वेदनाटकम्, (विद्यानिधिप्रकाशक, दिल्ली, प्रथमसंस्करण) प्रथमोऽङ्कः, पृ. सं. 15

7. भर्तृहरिनिर्वेदनाटकम् प्रथमांके, पृ. 107

हार्दिक शुभकामनों सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

**सस्ता, मजबूत एवं टिकाऊ**

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

**एवं**

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

**उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें**

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# अपवादशास्त्रस्य परिभाषात्वम्

❑ नरेशसिंहः

मङ्गलाचरणम् -

**अष्टाध्यायी जगन्माता यस्य चित्तात्समुत्थिता।**
**वेदानामुपकाराय तस्मै पाणिनये नमः।।**
**येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।**
**तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः।।**

पाणिनीयव्याकरणम् उत्सर्गापवादशास्त्रम् मन्यते, व्याकरणशास्त्रे प्रायः सर्वेषु प्रकरणेषु एतादृशाः नियमाः लभ्यन्ते यथा- सन्धिप्रकरणे **'आद्गुणः'** ३/०१/८७ इत्यनेन सूत्रेण अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः भवति, तदाधारेण उपेन्द्रः, **रमेशः, गङ्गोदकम्, सहोदरः,** इत्यादयः शब्दाः सिद्धा भवन्ति। गुणविधायकसूत्रात्परं वृद्धिविधायकेन **'वृद्धिरेचि'** ६/०१/८८ इत्यनेन सूत्रेण आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः। अनेन सूत्रेण वृद्धिर्भवति यथा- **कृष्ण+ एकत्वम्** इत्यस्यां स्थितौ गुणप्राप्तिर्भवति किन्तु प्रकृतसूत्रं गुणसूत्रं प्रबाध्य वृद्धिं करोति। वृद्धिरेचि परसूत्रमस्ति अतो बलीयो वर्तते। अनेन प्रकारेण **गङ्गौघः, देवैश्वर्य, कृष्णौत्कण्ठ्यम्** इत्यादिषु उदाहरणेषु गुणसन्धिप्राप्ते सत्यपि वृद्धिसन्धिर्भवति अत्राप्यपवादशास्त्रं प्रवर्तते। **उपसर्गादृति धातौ ६/०१/९१** इदं सूत्रमपि वृद्धिरेकादेशं करोति, उदाहरणम् - **प्रार्च्छति। उपार्च्छति।** अनयोः उदाहरणयोरपि गुणसन्धिः प्राप्यते किन्तु परसूत्रबलात् गुणत्वं प्रबाध्यते, सन्धिप्रकरणे परशास्त्रं बलवदस्ति। अस्य बहूनि उदाहरणानि लभ्यन्ते यथा- सूत्रं वर्त्तते 'एङि **पररूपम्' ६/०१/९४,** इदं सूत्रं वृद्धिसन्धिं प्रबाध्य पररूपत्वं करोति। **वृत्तिः** - अवर्णान्तादुपसर्गादी धातौ परे पररूपमेकादेशः स्यात्। उदाहरणम्- प्रेजते इति, अत्र प्र+एजते विग्रहे सति 'वृद्धिरेचि' इत्यनेन सूत्रेण वृद्धिसन्धिः प्राप्यते तं प्रबाध्य प्रकृतसूत्रेण पररूपत्वं भवति। प्रेजते- इति रूपं सिध्यति तथैव उपोषति रूपं सिद्धं भवति। अनेन प्रकारेण अपवादशास्त्रस्य बलावत्त्वम् अवलोक्यते।

**विषयप्रवेशः -**

अपवादशास्त्रं व्याकरणशास्त्रे सर्वस्थले परिलक्ष्यते, 'अपवादशास्त्रस्य परिभाषात्वम्' अमुं विषयमधिकृत्य अस्मिन् शोधपत्रे किञ्चिद्विमृश्यते।

**परिभाषालक्षणम् - 'अनियमे नियमकारिणी परिभाषा' इति।**

परिभाषायाः व्युत्पत्तिलभ्योऽर्थो वर्त्तते - **'परितः सर्वतो भाष्यन्ते नियमाः याभिः ताः- परिभाषाः'** इति। कानिचन परिभाषासूत्राण्युल्लिख्यन्ते यथा -

**1. इको गुणवृद्धी ( १-१-३ )।**
**2. अचश्च ( १-२-२८ )।**
**3. आद्यन्तौ टकितौ ( १-१-४६ )।**
**4. मिदचोऽन्त्यात्परः ( १-१-४७ )**
**5. षष्ठी स्थानेयोगा ( १-१-४९ )।**

**6. स्थानेऽन्तरतम: ( १-१-५० )।**

**7. तस्मिन्निति निर्दिष्टे पूर्वस्य ( १-१-६६ )।**

**8. तस्मादित्युत्तरस्य ( १-१-६७ )।**

**9. अलोऽन्त्यस्य ( १-१-५२ )।**

**10. ङिच्च ( १-१-५३ )।**

**11. आदे: परस्य ( १-१-५४ )।**

**12. अनेकाल्शित्सर्वस्य ( १-१-५५ )।**

**13. स्वरितेनाधिकार: ( १-३-११ )।**

इत्यादीनि परिभाषासूत्राणि वर्त्तन्ते। एभि: सूत्रै: यथाप्रसङ्गं प्रसक्ति: क्रियते।

परिभाषासूत्रेषु बहुत्र अपवादशास्त्रमेव विद्यते, यथा - एकवर्णात्मक-अनेकवर्णात्मकानाम् आदेशानां व्यवस्थायै भगवता पाणिनिना त्रीणि सूत्राणि विरचितानि, तानि- 1. अलोऽन्त्यस्य 2. ङिच्च 3. अनेकाल् शित् सर्वस्य। एषु सामान्यतया प्रथमं सूत्रम् एकवर्णात्मकादेशस्य स्थानिनोऽन्तिमवर्णस्य स्थाने भवति। 2. ङ् इत्संज्ञकादेशस्य क्षेत्रं व्यापकमस्ति, तदेकवर्णात्मकानेकवर्णात्मकयो: अवस्थयो: अन्त्यस्य स्थाने भवति। 3. 'श्' इत्संज्ञकस्य 'ङ्' इत्संज्ञकस्य च अतिरिक्तम् अनेकवर्णात्मक: आदेश: सकलस्थानिनम् अभिव्याप्नोति इति।

**परिभाषासूत्रेषु अपवादशास्त्रत्वम् -**

**1. अलोऽन्त्यस्य - ( १-१-५२ )**

**सूत्रार्थ:** - 'षष्ठीनिर्दिष्टस्यान्त्यस्याल आदेश: स्यात्'।

**2. ङिच्च- ( १-१-५३ )**

सूत्रार्थ: - अयमप्यन्त्यस्यैव स्यात्। इदं सूत्रम् अनेकाल्शित्सर्वस्य इत्यस्य सूत्रस्यापवादसूत्रं वर्त्तते। अनेकाल्शित्सर्वस्य (१-१-५२) इत्यस्य सूत्रस्य प्राप्तौ इदं पूर्वापवादसूत्रं वर्त्तते। अस्मिन् स्थले अपवादशास्त्रस्य परिलक्ष्यत्वं वर्त्तते।

**3. अनेकाल्शित्सर्वस्य - ( १-१-५५ )**

सूत्रार्थ: - स्पष्टम्। 'अलोऽन्त्यस्य' सूत्रापवाद:। 'अष्टाभ्य औश्' इत्यादौ **आदे: परस्य** इत्येतदपि परत्वादनेन बाध्यते।

यत्र **आदे:परस्य** एवञ्च **अनेकाल्शित्सर्वस्य** अनयो: सूत्रयो: प्राप्ति: यदि युगपद्भवति चेत् क्रमानुसारं परसूत्रस्य प्राधान्यं भवति, अत: **अनेकाल्शित्सर्वस्य** इति सूत्रस्यैव प्राप्तिर्भवति।

उदाहरणम्- **अष्टौ**। प्रक्रिया- अष्टन्+जस् (अस्), अस्यां स्थितौ 'अष्टाभ्य औश्' सूत्रे पञ्चमीविभक्ते: निर्देशकारणात् अष्टन् शब्दात्परम् औश् इत्यस्य प्रसक्तौ सत्यां **आदे:परस्य** परिभाषाया: सहकारेण 'अस्' इत्यस्यादिवर्णाकारम् औ आदेशस्य प्राप्तिर्भवति किन्तु परशास्त्रकारणात् **अनेकाल्शित्सर्वस्य** इति सूत्रं तस्य बाधकत्वेन कार्यं करोति, अत: सम्पूर्ण- अस् इति स्थाने औ भवति।

इमानि परिभाषासूत्राणि पठित्वा ज्ञायते यत् प्रयोगस्थले यदि एकस्मै कार्याय द्वे सूत्रे प्रवर्तेते चेत् परशास्त्रं बलीयो भवति इति।

पाणिनीयव्याकरणमाधारीकृत्य श्रीमन्नागेशभट्टेन परिभाषेन्दुशेखर: नाम्ना ग्रन्थो विरचित: तस्मिन् नैका:

परिभाषा: विलिखिता: वर्त्तन्ते, सर्वा: परिभाषा: यथाशास्त्रं नियमान् प्रबोधयन्ति।

**1. पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय:।**

**2. सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव।**

**3. विकरणेभ्यो नियमो बलीयान्।**

**4. परान्नित्यं बलवत्।**

**5. असिद्धं बहिरङ्गमन्तरङ्गे।**

**6. अन्तरङ्गादप्यपवादो बलीयान्।**

**7. वार्णादाङ्गं बलीयो भवति।**

**8. क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति।**

**9. पुरस्तादपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्।**

**10. मध्येऽपवादा: पूर्वान् विधीन् बाधन्ते नोत्तरान्।**

**11. पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्ग:।**

**12. प्रकल्प्य चापवादविषयं तत उत्सर्गोऽभिनिविशते।**

**13. उपसञ्जनिष्यमाणनिमित्तोऽप्यपवाद उपसञ्जातनिमित्तमप्युत्सर्गं बाधते।**

**14. अपवादो यद्यन्यत्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते।**

**15. उभयनिर्देशे पञ्चमीनिर्देशो बलीयान्।**

इमा मुख्या: परिभाषा: वर्तन्ते यत्र मुख्यत्वेन अपवादशास्त्रस्य वर्णनं लभ्यते। उपरि लिखितासु परिभाषासु प्रथमा परिभाषा बोधयति किं शास्त्रं बलवदस्ति इति।

यथा - **पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय:** - परिभाषायाम् उक्तेषु विषयेषु पूर्व-पूर्वशास्त्रं प्रति परशास्त्रं बलवद्भवति।

पूर्वात्परं बलवत्। विप्रतिषेधशास्त्रात्पूर्वस्य परं बाधकमिति यावत्।

विवरणम्- 1. परशास्त्रेण पूर्वशास्त्रस्य बाधस्योदाहरणम् - वृक्षेभ्य:, अयं प्रयोगो वर्त्तते, वृक्ष+भ्यस् अस्यां स्थितौ **सुपि** च अनेन सूत्रेण दीर्घत्वं प्राप्यते तथा च **बहुवचने झल्येत्** अनेन सूत्रेण एत्वं प्राप्यते, उभयविधत्वं कार्यं प्राप्यते, द्वयो: सूत्रयो: समबलत्वं विद्यते। एतादृश्यां स्थितौ परशास्त्रं बलीयो भवति। अत्र परसूत्रं **बहुवचने झल्येत्** वर्तते, अत: एत्वं भवति, इति।

2. परशास्त्रस्य अपेक्षया नित्यशास्त्रस्य बलवत्ता वर्तते, यथा- तुदति प्रयोगे शप्रत्यय: एवञ्च लघूपधगुण: सहैव प्राप्नुत:, किन्तु श-प्रत्ययानन्तरं तुद् इत्यस्य गुणो न भवति यतोहि श- प्रत्यय: ङित् वर्त्तते। अनया परिभाषया ज्ञायते यत् नित्यशास्त्रं कथं बलवत्त्वं प्राप्नोति इति।

3. परशास्त्रस्य अपेक्षया अन्तरङ्गशास्त्रस्य

बलवत्ता भवति, उदाहरणम् – **उभये देवमनुष्याः**। अन्तरङ्गशास्त्रस्य बलवत्तायाः बोधनं असिद्धं बहिरङ्गमन्तरङ्गे परिभाषया क्रियते, इति।

4. परशास्त्रस्य अपेक्षया अपवादशास्त्रं बलीयो भवति, उदाहरणम्- **दध्ना**। अस्मिन् प्रयोगे **अनेकाल्....** सूत्रं यत् परशास्त्रं वर्त्तते किन्तु अपवादत्वात् **ङिच्च** अनेन सूत्रेण अन्त्य-स्थाने अनङ् आदेशो भवति। अनया परिभाषया ज्ञायते परशास्त्रात् अपवादो बलीयान् भवति, इति।

5. अन्तरङ्गत्वात् अपवादशास्त्रस्य बलवत्ता भवति। उदारहरणम्- **श्रीशः**। अस्मिन् प्रयोगे अन्तरङ्गत्वात् यण् प्राप्तो वर्तते तं प्रबाध्य अपवादत्वात् दीर्घो भवति।

अनेन प्रकारेण अस्माभिः ज्ञातुं शक्यते यत् अपवादशास्त्रमेव बलवदस्ति, अत एव नियमान् बोधयितुं परिभाषासूत्राणां परिभाषाणां च विनियमनं कृतम्।

– **सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव।**

अस्याः परिभाषायाः पठनेन ज्ञानं भवति यत् उभे शास्त्रे युगपदेव प्राप्येते चेत् यच्छास्त्रं सकृद्बाधितं भवति चेत्तद्बाधितमेव भवति। यथा- **तिसृणाम्** इत्यस्मिन् प्रयोगे इयं परिभाषा सङ्घटते, इति।

– **असिद्धं बहिरङ्गमन्तरङ्गे**

अन्तरङ्गशास्त्रस्य दृष्टौ बहिरङ्गशास्त्रम् असिद्धं भवति। अतः अत्रापि अपवादशास्त्रस्य प्रसक्तिर्भवति। अन्तरङ्गबहिरङ्गशास्त्रयोः युगपत्-प्राप्तिर्भवति, तदानीम् अन्तरङ्गशास्त्रं बलीयो भवति।

**निष्कर्षः** –

परिभाषाप्रकरणे सूत्रेषु अपवादसूत्राणि वर्त्तन्ते तानि सूत्राणि सामान्यशास्त्रं प्रबाध्य अपवादशास्त्र-रूपेण प्रवर्त्तन्ते येन प्रयोगाः सिध्यन्ति। भट्टोजिदीक्षितेन वैयाकरण**सिद्धान्तकौमुद्यां** प्रकरणेषु पूर्वम् उत्सर्गसूत्राणि वर्णितानि तदनु अपवादोत्सर्गयोः भेदो दर्शितः। तन्माध्यमेन सर्वेषां प्रयोगाणां रूपसिद्धयो भवन्ति। प्रायः सर्वेषु प्रकरणेषु अपवादसूत्राणि वर्तन्ते, तैः सूत्रैः विशेषप्रयोगाः सिध्यन्ति।

**परिभाषेन्दुशेखरे** श्रीमन्नागेशभट्टेन नैकाः परिभाषाः अलिख्यन्त। तत्र अपवादशास्त्रनियमानां विस्तारपूर्वकं वर्णनमुपलभ्यते इति।

– **शोधच्छात्रः**, जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्

**सन्दर्भग्रन्थाः** –

1. परिभाषेन्दुशेखरम् – श्रीमन्नागेशभट्टविरचितः ग्रन्थः।
2. वैयाकरणसिद्धन्तकौमुदी – श्रीभट्टोजिदीक्षितविरचिता।
3. अष्टाध्यायी – भगवता पाणिनिना विरचिता।

पुस्तक-समीक्षा

# महराजदीन पाण्डेयकाव्यानि

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

भारत्या गतेष्वङ्केषु ग़ज़लगीतीनां चर्चा दृष्टा स्यात् पाठकैः। ग़ज़लसङ्कलनपुस्तकसमीक्षा, प्रो. अभिराजराजेन्द्रमिश्रस्य गलज्जलिका चापि पठिता स्यात्। गते मासे एवास्माभिः सुप्रथितस्य कविवर्यस्य डॉ. महराजदीनपाण्डेयस्य काव्यरचनासङ्कलन-चतुष्टयमधिगतं यस्मिन् त्रीणि कवितासङ्कलनानि संस्कृतगजलगीतीनामेव सन्ति यानि प्रमाणयन्ति यत् कविवर्यो महाराजदीनपाण्डेयोऽनेकेभ्यो वर्षदश-केभ्यः संस्कृते ग़ज़लगीतिरचनायां संलग्नोऽस्ति।

एको गजलसङ्ग्रहः **'मौनवेधः'** शीर्षकवहः प्रायो दशकत्रयपूर्वं प्रकाशितोऽभूत् (1991 ई. वर्षे) यस्य द्वितीयं संस्करणं 2017 ई. वर्षे प्रकाशितम्, अपरः सङ्ग्रहः **'काक्षेण वीक्षितम्'** शीर्षकवहः 2004 ई. वर्षे प्रकाशितोऽभूद् यस्य द्वितीयं संस्करणं 2016 ई. वर्षे प्रकाशितम्। सर्वेषां गीतिसङ्ग्रहा-णामयं विशेषो यत् सर्वेषु संस्कृतकाव्यरचनानां हिन्द्यामनुवादोऽपि प्रकाशितोऽस्ति। एकस्मिन् काव्यसङ्ग्रहे (मध्ये यक्षमेघयोः) मेघदूतं स्मारयन्ति पद्यानि मन्दाक्रान्तायामपि सन्ति, तदनन्तरं **'रुबाई'** छन्दस्यपि सन्ति। **'प्रतिप्रवाहम्'** शीर्षकवहः सद्यः प्रकाशित एको ग़ज़लसङ्ग्रहः पर्यन्ते छन्दोमुक्तरचना अपि प्रस्तौति यासां परिचयो **'वृत्तगन्धि वृत्तम्'** इत्येवं प्रत्तोऽस्ति।

**'मौनवेध'** शीर्षकवहे मुक्तकसङ्ग्रहे मुक्तकानां त्रीणि सन्धानानि (सङ्कलनानि) सन्ति। प्रथमे गीतिसन्धाने विभिन्नेषु चरणेष्वन्त्यानुप्रासयुताः काव्यरचनाः प्रस्तुताः सन्ति, द्वितीये ग़ज़लसन्धाने 25 गजलगीतयः प्रस्तुताः सन्ति, तृतीये मुक्तकं 41 पद्यानि प्रस्तुतानि येषु कतिपयानि संस्कृतच्छन्दःसु रचितानि कतिपयानि लौकिकच्छन्दःसु रचितानि, प्रत्येकं पद्यं स्वतन्त्रं मुक्तकमस्ति। पुस्तकस्याग्रिमे भागे क्रमशः सर्वेषां मुक्तकानां हिन्द्यनुवादो मुद्रितोऽस्ति।

**'काक्षेण वीक्षितम्'** शीर्षकवहस्य मुक्तकसङ्ग्रहस्य पूर्वार्धे 32 ग़ज़लगीतयः सन्ति यासां शीर्षकं नैव प्रत्तमस्ति यतो ग़ज़लगीतीनां किमपि शीर्षकं नैव भवतीत्युर्दूभाषासाहित्यस्य सिद्धान्तोऽस्ति यतः प्रत्येकं चरणस्य (शेर) वक्तव्यं स्वतन्त्रं भवति, समग्राया गजलगीतेरेको विषयो न भवति।

सङ्ग्रहस्योत्तरार्धे विभिन्नान् विषयानादाय रचिताः 8 काव्यरचनाः सङ्कलिताः सन्ति यथा ग्रामवर्णनाय **'ग्रामोऽयम्'** दिल्लीवर्णनाय **'यातुधानीव दिल्ली'**। सङ्ग्रहेऽस्मिन् छन्दोवैविध्यं, गीतिविधा-वैविध्यं च कविवर्यस्य प्रस्तुतेः प्रमुखमुद्देश्यमस्तीति भूमिकायां सूचितमस्ति। प्रत्येकं काव्यरचनया सहापरे पृष्ठे तस्या हिन्द्यनुवादो मुद्रितोऽस्ति। 'काक्षेण' पदं पठित्वा एतस्यार्थविगमे पाठकानाम- सुविधा सम्भवति। काक्षस्यार्थो भवति तिर्यग्दृष्टिः। 'तिर्यग्दृष्ट्या वीक्षितम्' इति

शीर्षकस्यास्य तात्पर्यमस्ति।

नूतनो गजलमुक्तकसङ्ग्रहः 'प्रतिप्रवाहम्' शीर्षकवहोऽस्ति। अस्मिन् षोडश संस्कृतग़ज़ल-गीतय उर्दूछन्दःशास्त्रानुसारं विरचिताः सन्ति, किन्तु कस्यांचन भुजङ्गप्रयातं छन्दोऽपि द्रष्टुं शक्यते, कस्यांचन पञ्चचामरच्छन्दोऽपीति कविना परिशिष्टे सूचितमस्ति। गीतीनां शीर्षकं नैव सूचितं यथा हि उर्दूसाहित्यस्य रीतिरस्ति। प्रत्येकं गजलगीत्या सहापरस्मिन् पृष्ठे सम्मुखे हिन्द्यनुवादो मुद्रितोऽस्ति। पूर्वार्धेऽस्य सङ्ग्रहस्य इमाः 16 गीतयः सन्ति, उत्तरार्धे चत्वारि गीतानि तथैव सानुवादानि मुद्रितानि, तदनु 'मुक्तकम्' शीर्षकेण 37 पद्यानि मुद्रितानि येषु अन्त्यानुप्रासवन्ति गीतिपद्यान्यपि सन्ति, संस्कृतच्छन्दोबद्धानि पद्यान्यपि येषु कविः स्वकीयं चिन्तनं देशदशानुरूपं स्पष्टतया प्रस्तौति। तदनन्तरं छन्दोमुक्तरचनाद्वयं मुद्रितमस्ति। '**जित्वरी जिजीविषा**' सामाजिक्याः स्थितेश्चिन्तनं प्रस्तौति, '**खिलम्**' शीर्षकवहा रचना विप्रवर्यस्य स्थितेश्चिन्तनं प्रस्तौति। रचनाद्वयस्यास्य हिन्द्यामनुवादो न मुद्रितः विभिन्नानां पदानां, वाक्यांशानां च स्पष्टीकरणार्थं हिन्द्यां टिप्पणी मुद्रिताऽस्ति। खण्डस्यास्य शीर्षकं मुद्रितमस्ति 'वृत्तगन्धिवृत्तम्' इति।

कविवर्यस्य महराजदीनपाण्डेयस्यापरमेकं काव्यरचनासङ्कलनं मेघदूते वर्णितां मेघस्य भारतदेशयात्रां पठित्वा कविरद्यतनस्य समयस्य स्थितिं विलोक्य यच्चिन्तनमनुभवति तस्य चिन्तनस्य काव्यमयं प्रस्तुतीकरणं संवहति। पुस्तकस्य शीर्षकमस्ति '**मध्ये यक्षमेघयोः**'। ग्रन्थस्य पूर्वार्धे षष्टि (60) संख्याकेषु मन्दाक्रान्ताबद्धेषु पद्येषु वर्तमानस्थितेश्चिन्ता प्रस्तुताऽस्ति कविना यत्र स्वकीयो जीवनानुभवः काव्यशैल्या सङ्केतितोऽस्ति, यक्षः सम्बोधितोऽस्ति। उत्तरार्धे सप्तति (70) संख्याकेषु 'रुबाई'-छन्दोबद्धेषु पद्येषु कविना स्वकीया मनोभावना चिन्तनं च प्रस्तुतमस्ति, मेघः सम्बोधितोऽस्ति। प्रतिपृष्ठं, प्रतिपद्यं तस्य हिन्द्यनुवादो मुद्रितोऽस्ति।

एवंविधानां ग्रन्थानां निरन्तरं प्रकाशनं कविवर्यस्य महराजदीन पाण्डेयस्य 'विभास' इति नामान्तरवहस्य सारस्वतं यशः सर्वत्र प्रसारयतीति वर्धापयामः कवितल्लजमेनम्।

**मौनवेधः**- कविः महराजदीन पाण्डेयः विभाषः, **प्रकाशकः** महेशकुमारसिंह, संग्रहटाइम्स, वजीराबाद, दिल्ली 84, पृ.सं. 135, मू. 125/-, 300/-

**काक्षेण वीक्षितम्** : कविः महराजदीन पाण्डेयः, विभाषः प्रकाशक ज्ञानभारती पब्लिकेशन्स, 25/73, शक्तिनगर, दिल्ली 7, पृ.सं. 119, मूल्यम् 395/-

**मध्ये यक्षमेघयो** : कविः महराजदीन पाण्डेयः विभाषः, **प्रकाशकः** ज्ञानभारती पब्लिकेशन्स, 25/73, शक्तिनगर, दिल्ली 7, पृ.सं. 145, मूल्यम् 495/-

**प्रतिप्रवाहम्** : कविः महराजदीन पाण्डेयः विभाषः, **प्रकाशकः** रचनाकार पब्लिशिंग हाउस, जगतपुरी विस्तार, शाहदरा, दिल्ली-3, पृ.सं. 111, मूल्यम् 200/-, 300/-

नारी-स्तम्भः

# नारीहिंसा महत्पापम्

❑ डॉ. राजेश्वरी भट्टः

स्वतन्त्रतायाः प्राप्तेरनन्तरं स्वाधीने राष्ट्रे सर्वाधिकारसम्पन्ना नारी सर्वकार- समाज-परिवारादीनां प्रोत्साहनेन आत्मबलेन च पूर्वप्रतिष्ठां समधिगन्तुं सततं चेष्टमाना कृतसंकल्पा च दृश्यते। दीर्घकालाद् गृहभित्तावेव जीवनं यापयन्ती नारी सम्प्रति न केवलं राष्ट्रे अपितु अन्ताराष्ट्रियस्तरेऽपि उच्चपदेषु प्रतिष्ठिता राष्ट्रस्य कीर्तिं कलयति। अद्य शिक्षा-चिकित्सा-कला-वाणिज्य-उद्योग-राजनीति-समाजसेवा-जल-थल-अन्तरिक्षे सेनाविभागेषु नारीणां न केवलं प्रवेशो दृश्यते अपितु प्रावीण्यं प्रतिभाति। नारी राष्ट्रस्य समुन्नयनं वर्तते। नारीणां सुरक्षा सम्मानश्च भारतीयानां परमो धर्मो वर्तते! भारत देश आदिकालादेव नारीपूजको वर्तते, नारीणां हिंसा निन्दा अवमानश्चात्र घोरं पापं मन्यते। कथितञ्च -

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः।।
मनुस्मृतिः ३/५६

को न जानाति यत् पुरा मातुः सीतायाः सम्मानस्य रक्षार्थं रामरावणयोर्मध्ये प्रवृत्ते तुमुले युद्धे रामेण रावणस्य वधः कृतः। एवमेव पाण्डववंशस्य साम्राज्ञ्या द्रौपद्या अपमानः कौरवकुलस्य नाशकारणमभवत्। किन्तु खेदावहोऽस्ति विषयोऽयं यत् लोकतान्त्रिकदेशेषु शीर्षस्थे भारतदेशे तथ्येनानेन सुपरिचितैरपि आत्मघातिभिर्दुर्जनैः जघन्यकृत्यैर्नार्यः पीड्यन्ते। अद्य विद्यामन्दिरे, चिकित्सालये, कार्यस्थले, देवस्थाने, वाहने, शून्यमार्गे किमधिकं परिवारेष्वपि नारी सुरक्षिता नास्ति। मोहग्रस्ता नरपिशाचा अवसरं प्राप्य नारीभिः सह कमपि दुर्व्यवहारं कर्त्तुं न बिभ्यति। आत्मना विहितस्य दुष्कर्मणः परिणामेन सर्वथाऽन-भिज्ञा इमे गृध्रा युवतीनां शरीरे अम्लयुक्तं रसायनं प्रक्षिप्य विरूपाः ताः कुर्वन्ति। शून्ये मार्गे गच्छन्तीभिः किशोरीभिः सह बलात्कारं कृत्वा मोदन्ते। ततोऽभिज्ञानभीत्या बालिकाया हत्यां कृत्वा अग्नौ क्षिपन्ति, अङ्गभङ्गं कृत्वा जले क्षिपन्ति वा। राष्ट्रे नारीहिंसाया अनुबन्धोऽयं अविरतः प्रवर्धमानो दृश्यते। 2012 तमे वर्षे राष्ट्रस्य राजधान्यां दिल्ली-नगर्यां घटितेन 'निर्भयाकाण्डेन' निखिलं राष्ट्रं कम्पितं जातम् यत्र तत्र सर्वत्र अस्या दुर्घटनाया विरोधे जनसमूह उत्थितो जातः। ततोऽपि दुराचारस्य क्रमोऽयं, पूर्वापेक्षया वर्द्धमानो दृश्यते। अद्य सम्पूर्णराष्ट्रे घटितैः हिंसायाः घटनाभिः नारीणां अभिभावका भीता दृश्यन्ते। सम्प्रति राजस्थान-प्रदेशेऽपि संक्रमणोऽयं दृढेन पदमकरोत्। इदानीमेव 3 अगस्त 2023 तमे दिने भीलवाड़ा नगरे कैश्चित् नरपिशाचैर्वने गच्छन्त्या चतुर्दशवर्षीयया बालिकया सह सामूहिकबलात्कारं कृत्वा सा अग्नौ प्रक्षिप्ता। एवमेव सम्प्रति मणिपुरे जातायां हिंसायां उग्रजन-समूहेन द्वाभ्यां नारीभ्यां सह पूर्वं बलात्कारं कृत्वा ततो निर्वसनयोः तयोः नगरे भ्रमणं कारितम्। राष्ट्रस्य कीर्तिं कलङ्कितां कुर्वन् नारीहिंसाया क्रमोऽयं येन केनापि प्रकारेण वारणीयः।

## हिन्दी अनुवाद

स्वतन्त्रता प्राप्ति के पश्चात् स्वाधीन भारत देश में सर्वाधिकार सम्पन्ना नारी सरकार-समाज तथा परिवार आदि के प्रोत्साहन से तथा अपने आत्मबल से अपनी पूर्व प्रतिष्ठा को प्राप्त करने के लिए निरन्तर संघर्षशीलता एवं संकल्पवती है। लम्बे समय से घर की चार दीवारी में ही जीवन व्यतीत करने वाली नारी अब केवल राष्ट्र में ही नहीं अपितु सम्पूर्ण विश्व में उच्च पदों पर प्रतिष्ठित होकर राष्ट्र का गौरव बढ़ा रही है। आज शिक्षा, चिकित्सा, कला, वाणिज्य, उद्योग, राजनीति, समाजसेवा तथा जल, थल एवं अन्तरिक्ष इन तीनों सेना विभागों में नारियों का केवल प्रवेश ही नहीं किन्तु पूर्ण प्रावीण्य प्रतीत होता है। नारी राष्ट्र का अर्द्धांग है, उसकी समुन्नति सम्पूर्ण राष्ट्र की समुन्नति है। नारी की सुरक्षा एवं सम्मान देशविसियों का परम धर्म है। भारत देश आदिकाल से ही नारी-पूजक देश है, नारियों की हिंसा एवं अवमानना यहाँ घोर पाप माना जाता है। कहा भी गया है –

**जहाँ नारी का सम्मान होता है वहाँ देवता निवास करते हैं तथा जहाँ उनका सम्मान नहीं होता वहाँ सभी कार्य निष्फल हो जाते हैं।** मनुस्मृति ३/५६

कौन नहीं जानता है कि माता सीता की रक्षा के लिए रामायण काल में राम-रावण के मध्य होने वाले घोर युद्ध में राम के द्वारा रावण का वध किया गया। इसी प्रकार पाण्डव वंश की महारानी द्रौपदी का अपमान कौरववंश के विनाश का कारण सिद्ध हुआ। किन्तु खेद का विषय है कि लोकतान्त्रिक देशों में विश्व में शीर्षस्थ भारत देश में इस तथ्य से सुपरिचित होने पर भी आत्मघाती दुर्जनों के द्वारा निरन्तर, गृहकलह, भ्रूणहत्या, यौनहिंसा, बलात्कार जैसे घृणित कार्यों से चिकित्सालयों, कार्यस्थलों, देवस्थानों, वाहनों, शून्य मार्गों, यहाँ तक कि परिवारों में भी नारी सुरक्षित नहीं है। मोहग्रस्त नरपिशाच अवसर मिलते ही नारियों के साथ जघन्य व्यवहार करने में भयभीत नहीं होते हैं। अपने द्वारा किये जाने वाले दुष्कर्म परिणाम से सर्वथा अनभिज्ञ ये गिद्ध युवतियों के शरीर पर तेजाब फेंक कर उनको कुरूप बना देते हैं। सूने मार्ग में जाती हुई किशोरियों के साथ बलात्कार का महोत्सव मनाते हैं फिर अपनी पहचान के डर से बालिका की हत्या कर उसे अग्नि में फेंक देते हैं अथवा अङ्ग-भङ्ग कर उसे जल में फेंक देते हैं। राष्ट्र में नारी हिंसा का यह निन्दनीय क्रम निरन्तर बढ़ता जा रहा है। 2012 में राष्ट्र की राजधानी दिल्ली में घटित **'निर्भयाकाण्ड'** से सम्पूर्ण राष्ट्र विचलित हो गया था। इस दुर्घटना के विरोध में जनसमूह आन्दोलित था। किन्तु फिर भी यह हिंसा का क्रम पूर्व की अपेक्षा निरन्तर बढ़ता ही जा रहा है। आज सम्पूर्ण राष्ट्र में घटित होने वाले नारी हिंसा के समाचारों से नारियों के अभिभावक भयभीत हैं। **राजस्थान** भी अब इस भयानक संक्रमण से संक्रमित हो रहा है। कुछ दिन पूर्व ही 3 अगस्त 2023 को भीलवाड़ा में कुछ नृशंस युवकों ने वन में जाती हुई 14 वर्ष की बालिका के साथ बलात्कार कर उसे अग्नि में फेंक दिया। इसी प्रकार **मणिपुर** में होने वाली हिंसा में उग्रभीड़ ने दो नारियों के साथ सामूहिक बलात्कार कर उन्हें निर्वस्त्र कर सम्पूर्ण नगर में घुमाया। राष्ट्र को कलंकित करने वाली हिंसा का घृणित कर्म बन्द होना चाहिए।

**– पूर्व-संस्कृतविभागाध्यक्षा,**
**लालबहादुर-शास्त्री कॉलेजः, जयपुरम्।**

आयुर्वेद-स्तम्भः

# ग्रहणीमनुपालयेत्

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**पाञ्चभौतिकेऽस्मिन् क्रियाशीले शरीरे निरन्तरं शीर्णनं भवत्यत एव तत्पूर्त्यर्थं प्रतिदिनमेवाहारं गृह्णन्ति प्राणिनः । भारतवर्षे तु पारम्परिकरूपेण शरीरपुष्टिकराणां दोषदेशर्त्वनुकूलानामाहार-द्रव्याणामाआहारयोगिद्रव्याणाञ्च ग्रहणङ्-कुर्वन्ति जनाः। आहारे त्वन्नमांसशाकफलदुग्ध-दधिघृततक्रतैलमध्वादीनामन्येषाञ्चाहारयोगि-द्रव्याणां सैन्धवक्षारकृष्णजीरकजीरकयवानी-धान्यकनागरमरिचहरिद्राराजिकासर्षपपिप्पलीपि प्पलीमूल-चित्रकत्वगेलापत्रकेसरेत्यादीनां द्रव्याणां विधिविहितं सेवनं कृत्वा देहधात्वोजोबलवर्णादिपोषणमवाप्नुवन्ति ।**

इस पाञ्चभौतिक क्रियाशील शरीर में निरन्तर शीर्णन (क्षय, झड़ना) होता है इसलिए उसकी पूर्ति के लिए प्रतिदिन ही प्राणी आहार को ग्रहण करते हैं। भारतवर्ष में तो लोग पारंपरिक रूप से शरीर को पुष्ट करने वाले दोष, देश, ऋतु के अनुकूल आहारद्रव्यों का एवं आहारयोगिद्रव्यों का ग्रहण करते हैं। आहार में तो अन्न, मांस, शाक, फल, दुग्ध, दधि, घृत, तक्र, तैल एवं मधु इत्यादि का तथा सैन्धव, क्षार, कृष्णजीरक, जीरक, यवानी (अजवाइन), धनिया, सोंठ, मरिच, हरिद्रा, राई, सरसों, पिप्पली, पिप्पलीमूल, चित्रक, दालचीनी, इलायची, तेजपत्ता, केसर इत्यादि आहारयोगिद्रव्यों का विधिविहित सेवन करके देहधातुओं का तथा ओजस्, बल एवं वर्णादि का पोषण प्राप्त करते हैं।

**इष्टैर्गन्धादिभिरुपहितमिष्टमन्नं देहं प्रीणाति देहे स्थितानि च घ्राणादीनीन्द्रियाण्यपि प्रीणाति। अनुकूलविहारसहितेन गृहीतेनानेनाहारेण व्यवस्थितरूपेण स्वास्थ्यानुवर्तनं भवति। विधिविहितेन गृहीतेनानेनाहारेण यदृच्छया देहपोषणं स्वास्थ्यानु-वर्तनञ्च न भवत्यपितु तत्राग्निर्हेतुरस्ति, यतो हि गृहीतस्याहारस्य पाकादनन्तरमेव पक्वादाहारादेव शरीरस्थाः धातवः पुष्यन्ति न ह्यपक्वादन्नाद्रसादयः धातवः शरीरस्थान्यन्यानि च तत्त्वानि पुष्यन्ति ।**

अभीष्ट गन्धादि से युक्त इष्ट अन्न देह को पुष्ट करता है और देश में स्थित घ्राणादि इंद्रियों को भी पुष्ट करता है। अनुकूल विहारसहित गृहीत इस आहार से व्यवस्थित रूप से स्वास्थ्यानुवर्तन होता है। विधिविहित गृहीत आहार से यदृच्छा से यों ही देहपोषण एवं स्वास्थ्यानुवर्तन नहीं होता है अपितु इसमें अग्नि का हेतुत्व है क्योंकि गृहीत आहार का पाक के बाद ही पक्व आहार से शरीरस्थ धातु पुष्ट होते हैं, अपक्व अन्न से रस आदि धातु तथा शरीरस्थ अन्य तत्त्व पुष्ट नहीं होते हैं।

**आयुर्वेदमतानुसारेण तु शरीरे त्रयोदशाग्नयो भवन्ति, ते तु भूताग्नयः पञ्च, धात्वग्नयः सप्त, इति द्वादशाग्नयः प्रमुखश्च जाठराग्निः। देहपोषकप्रधानजाठराग्निरेव प्राथमिकरूपेणा-हारपाकप्रक्रियायाः प्रारम्भं करोति। यतो ह्यन्नस्य पक्ता जाठराग्निः सर्वेषां पक्तॄणामधिपो मतः।**

**अन्ये चाग्नयः तन्मूलास्ते हि तद्वृद्धिक्षयवृद्धि-क्षयात्मकाः भवन्ति। शरीरे ह्यायुर्वर्णौ बलं स्वास्थ्यमुत्साहोपचयौ प्रभाऽन्ये चाग्नयः प्राणाश्च देहाग्निहेतुकाः प्रोक्ताः। शान्ते तु जाठराग्नौ जनः म्रियते, युक्ते (समे) चिरं जीवत्यनामयः, रोगी स्याद्विकृते तस्माज्जाठराग्निरेव प्राशस्त्यादन्वयव्यतिरेकविधानादेतेषामायुर्वर्णादीनां मूलं (प्रधानं कारणं) भवतीत्यर्थः। जाठराग्निस्त्वान्त्रेषु राजते। अत्राप्यामामाशये तस्य चाङ्गरूपेण सन्नद्धे ग्रहणीति नाम्ना प्रसिद्धे स्थानेऽग्निव्यापारो विशेषेण सम्पन्नो भवति।**

आयुर्वेद के मतानुसार तो शरीर में 13 अग्नियाँ होती हैं, वे तो पाँच भूताग्नियाँ सात धात्वग्नियाँ इस प्रकार से ये द्वादश अग्नियाँ तथा प्रमुख जाठराग्नि। देहपोषकप्रधान जाठराग्नि ही प्राथमिक रूप से आहार पाक की प्रक्रिया का प्रारंभ करती है क्योंकि अन्न का पाचन करने वाली जाठराग्नि ही इन सब ग्नियों का अधिप (राजा, प्रमुख, स्वामी) मानी गई है। अन्य अग्नियाँ तो तन्मूलक ही हैं जो कि उसकी वृद्धि एवं क्षय से वृद्धि एवं क्षय प्राप्त करने वाली होती हैं। शरीर में आयु, वर्ण, बल, स्वास्थ्य, उत्साह, पुष्टि, प्रभा तथा अन्य अग्नियाँ एवं प्राण देहाग्निहेतुक ही कहे गए हैं। जाठराग्नि के शांत होने पर व्यक्ति मर जाता है तथा इसके युक्त स्वरूप में (सम स्वरूप में) होने पर स्वस्थ रहता हुआ चिरकाल तक जीवित रहता है, इसके विकृत होने पर रोगी हो जाता है, इसलिए जाठराग्नि ही श्रेष्ठ होने से अन्वयव्यतिरेकविधान से इन आयु-वर्ण इत्यादि का मूल प्रधान कारण होती है, यह तात्पर्य है। जाठराग्नि तो आँतों में सुशोभित होती है, इसमें भी आमाशय में उसके अंग के रूप में बंधी हुई यह ग्रहणी इस नाम से प्रसिद्ध स्थान में अग्निव्यापार विशेष रूप से संपन्न होता है।

**आमाशये सम्बद्धा ग्रहणीति नाम्ना प्रसिद्धा ह्येषा प्राकृत स्वरूपेऽपक्वं धारयत्यन्नं पक्वं पार्श्वतः सृजति। विभिन्नैः कारणैः दुष्टा सा बहुशो भुक्तमाममेव विमुञ्चति। अजीर्णात्मकाद्विकारादतिरिक्तो ह्येषः विकारश्चरकसंहितायां 'ग्रहणीदोष' इति नाम्ना प्रसिद्धः, सर्वेषु विकारेश्वेष एवैतादृश एकाकी रोगो विकारो वा यो हि रोगनाम्ना न ज्ञायतेऽपितु दोषनाम्ना ('ग्रहणीदोष' इति नाम्ना) ज्ञायते।**

आमाशय से सम्बद्ध ग्रहणी इस नाम से प्रसिद्ध यह प्राकृत स्वरूप में अपक्व अन्न को धारण करती है और पक्व अन्न का पार्श्व से मुञ्चन कर देती है। विभिन्न कारणों से दूषित हुई वह खाए गए अन्न को अधिकांश रूप से आम स्वरूप में ही मुञ्चन कर देती है। अजीर्णात्मक विकार के अतिरिक्त यह विकार चरकसंहिता में 'ग्रहणीदोष' इस नाम से प्रसिद्ध है, सभी विकारों में यह इस प्रकार का एकाकी रोग या विकार है जो रोग नाम से नहीं जाना जाता अपितु दोष नाम से ('ग्रहणीदोष' इस नाम से) जाना जाता है।

**एषा ग्रहणी त्वग्न्यधिष्ठानमस्ति तथाऽऽमाशये मथितस्यावाप्तपाचनव्यापारस्यान्नस्य यदाऽऽमाशयाच्च्यवनम्भवति तदा तदन्नं सर्वप्रथमं ग्रहण्येव गृह्णात्यत एवान्नस्य ग्रहणाद्ग्रहणी मता। एषा ह्यपक्वमन्नं धारयति तत्रैव संस्थितेन विशेषेणाग्निना तदाहारः पच्यते, ततः तत्पक्वमन्नं पार्श्वतः सृजति ग्रहणी। यदा ह्यभोजनाद-**

**जीर्णातिभोजनाद्विषमाशनादसात्म्यगुरुशीतातिरूक्षसन्दुष्टभोजनात्तथा विभिन्नव्याधिभिः कर्षणाद्विरेकवमनस्नेहविभ्रमादेशकालर्तुवैषम्याद्वेगानां च विधारणात् स दुष्टोऽग्निः लघ्वप्यन्नं न पचति तदा तत्प्रभावप्रभाविता दुष्टा ग्रहणी त्वाममेव विमुञ्चति ।**

यह ग्रहणी तो अग्नि का अधिष्ठान है तथा आमाशय में मथित किए गए पाचनव्यापार को प्राप्त अन्न का जब आमाशय से च्यवन होता है तब उस अन्न को सर्वप्रथम ग्रहणी ही ग्रहण करती है इसलिए अन्न के ग्रहण करने के कारण इसे ग्रहणी माना गया है। यह अपक्व अन्न का धारण करती है और वहीं पर स्थित विशेष अग्नि के द्वारा वह आहार पचाया जाता है, उसके बाद वह पक्व अन्न को ग्रहणी पार्श्व से छोड़ देती है। जब अभोजन से, अजीर्ण से, अतिभोजन से, विषमाशन से, असात्म्य, गुरु, शीत, अतिरूक्ष एवं सन्दुष्टभोजन से तथा विभिन्न व्याधियों से कर्षण होने से तथा विरेचन, वमन एवं स्नेह के विभ्रम (इनके अनुचित प्रयोग से होने वाले विकारों) से, देश, काल, ऋतु के वैषम्य से एवं वेगों के विधारण करने से वह दुष्ट अग्नि लघु अन्न का भी पाचन नहीं करती है तब उसके प्रभाव से प्रभावित हुई यह दुष्ट ग्रहणी आम का ही विमुञ्चन करती है।

**यतो हि ग्रहणीदोषादेवेत्थं भवत्यत एवानेन विशेषाभिधेयग्रहणीशब्दत्वं ग्रहण्याश्रित-दोषजन्यग्रहणीगदस्यैवेहोच्यते। सामान्यतया जाठराग्निबलेनोपस्तम्भिता ( उपबृंहिता, सशक्तीकृता ) च सत्यपक्वमन्नं धारयति, पक्वं च वामपार्श्वतः सृजति; यतः ग्रहणीगुदौ वामपार्श्वाश्रयौ, तेन वामे पार्श्वे पक्वं सृजतीति युक्तम्। एतद्धि ग्रहण्याः प्राकृतं कर्म, यदा हि सा दुष्यति तदात्वाममेव ( अपक्वमेवान्नं ) विमुञ्चति ।**

क्योंकि ग्रहणीदोष से ही यह ऐसा होता है इसलिए इसके कारण ही विशेष रूप से अभिधानयोग्य ग्रहणी शब्द तो ग्रहणी के आश्रित दोष से उत्पन्न होने के कारण ही ग्रहणी रोग के लिए ही यह यहां कहा जाता है। सामान्यतया जाठराग्नि के बल से उपस्तम्भित (उपबृंहित, सशक्तीकृत) यह ग्रहणी अपक्व अन्न का धारण करती है और पक्व को वामपार्श्व से छोड़ देती है; क्योंकि ग्रहणी एवं गुद ये दोनों ही वामपार्श्व में आश्रय लिए हुए होते हैं, इसलिए वाम पार्श्व में पक्व का मुञ्चन करती है यह कहना उपयुक्त ही है। यह ग्रहणी का प्राकृत कर्म है जब वह दूषित होती है तब तो आम का ही ( अपक्व अन्न का ही ) मुञ्चन करती है ।

**ग्रहण्यामाश्रितो ह्यग्निदोषोऽत्र कारणत्वेन संस्थितोऽत एव विकारो ह्येष 'ग्रहणीदोषः' इति नाम्ना व्यपदिष्टः। एवं चाश्रयाश्रयिणोरभेदोपचाराद् ग्रहणीदोषशब्देन ग्रहण्याश्रितोऽग्नि-दोषोऽपि गृह्यते। अत एव चिकित्सायां ग्रहण्याः बलवर्धनात्मिका चिकित्सा तत्राश्रितस्य विशिष्टस्याग्नेरंशस्य च चिकित्सा विधीयते ।**

ग्रहणी में आश्रित अग्निदोष यहां पर कारण रूप में स्थित है इसलिए यह विकार 'ग्रहणीदोष' इस नाम से निरूपित किया गया है । इस प्रकार से आश्रय और आश्रयी में अभेदोपचार से ग्रहणीदोष शब्द से ग्रहणी में आश्रित अग्निदोष का भी ग्रहण किया जाता है, इसलिए चिकित्सा में ग्रहणी का बलवर्धन करने वाली चिकित्सा और वहां आश्रित अग्नि के विशिष्ट अंश की चिकित्सा की जाती ।

**ग्रहणीदोषे तु सामान्यतया जृम्भाऽङ्गमर्दस्तृष्णा च छर्दिः प्रवाहणमरोचकोऽविपाकश्च भवति, अम्लोद्गारश्चाप्यत्र दृश्यते, जनः पुनः पुनः उपविशति स्वल्पमात्रया चाममपक्वं वाऽऽहारं मुञ्चति कदाचित्तस्यान्नं दुःखेन पच्यते कदाचिदाध्मानग्रस्तोऽपि भवति जनः। स मानवः वातगुल्महृद्रोगप्लीहाशङ्की च भवति।**

ग्रहणीदोष में तो सामान्यतया जृम्भा, अङ्गमर्द, तृष्णा, छर्दि (वमन), प्रवाहण (मलत्याग के समय कुन्थन), अरोचक और अविपाक होता है , इसमें अम्लोद्गार भी देखा जाता है, व्यक्ति बार-बार मलत्याग करता है और स्वल्प मात्रा में आम अथवा अपक्व आहार का त्याग करता है, उसका अन्न कभी-कभी दुःखपूर्वक पचता है और कभी वह व्यक्ति आध्मानग्रस्त भी हो जाता है। वह व्यक्ति वातगुल्म, हृद्रोग एवं प्लीहरोग की आशंका करने वाला होता है।

**वर्तमानकाले हि जनाः देशर्तुविपरीतानामसात्म्यानाञ्चाहारद्रव्याणां 'पिज्जा-बर्गर-मोमोज-पास्ता-मञ्चूरियन-नूडल्स-पेस्ट्री-मैगी-चीजरोल' इत्यादीनां ग्रहणं विशेषेण कुर्वन्त्यभ्यासेन च पुनः पुनः गृह्णन्ति। अत एव तेषां ग्रहणी विशेषेण दुष्टा भवति। अजातग्रहणीदोषस्योत्पत्तिर्न भवेदतः त्याज्यान्येतान्याहारद्रव्याणि तथा ग्रहण्याः बलवर्धकानामौषधद्रव्याण्यां मध्ये मध्ये स्वस्थावस्थायामेव सेवनं करणीयम् , तेन हि ग्रहणीदोषजाः विकाराः न प्रादुर्भवन्ति यद्युपेक्षयाऽस्य जायन्ते ग्रहणीदोषजाः गदाः तर्हि यथाशीघ्रमेव दक्षेण चिकित्सकेन सह परामर्शं विधाय यथोचितां चिकित्सां गृह्णीयात्।**

वर्तमानकाल में लोग देश एवं ऋतु के विपरीत तथा असात्म्य आहार-द्रव्यों का 'पिज्जा-बर्गर-मोमोज-पास्ता-मञ्चूरियन-नूडल्स-पेस्ट्री-मैगी-चीजरोल' इत्यादि का ग्रहण विशेष रूप से करते हैं और अभ्यासपूर्वक बार-बार ग्रहण करते हैं इसलिए उनकी ग्रहणी विशेष रूप से दूषित होती है। जो ग्रहणीदोष उत्पन्न नहीं हुआ है वह उत्पन्न नहीं हो जाए इसलिए ये आहार-द्रव्य त्यागने योग्य हैं तथा बीच-बीच में ग्रहणी का बलवर्धन करने वाले औषद्रव्यों का स्वस्थावस्था में ही सेवन किया जाना चाहिए, इससे ग्रहणीदोषज विकार उत्पन्न नहीं होते हैं यदि इसकी उपेक्षा से ग्रहणीदोषज रोग हो जाते हैं तो यथाशीघ्र ही दक्ष चिकित्सक के साथ परामर्श करके यथोचित चिकित्सा लेनी चाहिए।

**अत्र केषाञ्चिद्योगानामुल्लेखः क्रियते। सामान्यतया वर्षर्तौ जाठराग्निर्मन्दो भवति जनाश्चास्मिनृतौ जिह्वालौल्यात् 'चाट-पकौडी' तथा 'पिज्जा-बर्गर-मोमोज' इत्यादीनां विकृतिकारकाणामाहारविकाराणां सेवनं विशेषेण कुर्वन्त्यत एव तद्दोषापहारकाणामामपाचकानामग्निवर्धकानाञ्च योगानां सेवनमावश्यकरूपेण करणीयम् । एते हि योगाः स्वस्थावस्थायां सप्त दिनानि यावद् यदा-कदा सेवनीयाः, केचित्तु सात्म्यमसात्म्यञ्चावेक्ष्य न्यूनाधिकदिनपर्यन्तमपि सेवनीयाः, निरन्तरं सेवनं तु चिकित्सकस्य परामर्शं विना न करणीयम्। योगास्तु-**

यहां कुछ योगों का उल्लेख किया जा रहा है। सामान्यतया वर्षा ऋतु में जाठराग्नि मंद होती है और

इस ऋतु में लोग जिह्वालौल्य के कारण (चटोरापन के कारण) 'चाट-पकौडी' तथा 'पिज्जा-बर्गर-मोमोज' इत्यादि विकृति करने वाले आहार-विकारों का सेवन विशेष रूप से करते हैं, इसलिए दोषों को दूर करने वाले आमपाचक एवं अग्निवर्धक योगों का सेवन आवश्यक रूप से करना चाहिए। ये योग स्वस्थावस्था में 7 दिन तक यदा-कदा सेवन करने चाहिए, कुछ योग तो सात्म्य एवं असात्म्य को देखकर कम या अधिक दिन तक भी सेवन किए जाने योग्य होते हैं, इनका निरंतर सेवन तो चिकित्सक के परामर्श के विना नहीं करना चाहिए । योग तो ये हैं-

**- ये हि सृष्टमलाः सन्ति तेषाङ्कृते तु नागरातिविषामुस्ताक्काथः श्रेष्ठ आमपाचनः पुरीषबद्धकरश्च भवति।**

**- ये हि विबन्धेन ग्रस्ताः सन्ति ते तु मुस्तानागरपथ्यानां चूर्णं प्रातः सायञ्चोष्णेन वारिणा गृह्णीयुः।**

**- ये हि पुनः पुनरुपविशन्ति प्रवाहण-पूर्वकञ्चाल्पं पुरीषं त्यजन्ति ते तु देवदारुवचा-मुस्तनागरातिविषाभयाचूर्णं सुखोदकेन पिबेयुः।**

**- वर्चस्यामे सशूले तु दाडिमाम्बुनोपर्युक्तं चूर्णं पिबेज्जनः।**

**- बिल्वं चित्रकं नागरं धान्यकं एते पृथक् पृथक् रूपेण पञ्चग्रामपरिमितायां मात्रायां गृहीत्वा संक्षुद्य क्राथविधिना क्राथं विनिर्मीय वर्षर्तौ स्वस्थोऽपि जनः वर्षाजनितस्य दोषस्य निवारणार्थं वारणार्थं वा पञ्चरात्रपर्यन्तं पिबेत्।**

**- कलिङ्गहिङ्ग्वतिविषावचासौवर्चलाभयाचूर्णं त्रिग्रामपरिमितायां मात्रायामुष्णजलेन प्रतिदिनं वारैकं वारद्वयं वा यः पञ्चदशदिवसपर्यन्तं पिबति स वर्षासु स्वस्थस्तिष्ठति पाण्डु-कामलातीसारार्शोग्रहणीदोषोदररोगैर्ग्रस्तो न भवति।**

- जिन व्यक्तियों के मल द्रवरूप में आता है ऐसे व्यक्तियों के लिए तो नागर (सोंठ), अतिविषा (अतीस) एवं नागरमोथा का क्राथ श्रेष्ठ आमपाचन एवं पुरीषबद्धकर होता है।

- जो लोग विबन्ध से ग्रस्त होते हैं उन्हें तो मुस्ता (नागरमोथा),नागर (सोंठ) एवं हरीतकी का चूर्ण प्रातः और सायङ्काल उष्ण जल से लेना चाहिए।

- जो लोग बार-बार मलोत्सर्जन करते हैं और प्रवाहणपूर्वक अल्प पुरीष का त्याग करते हैं उन्हें तो देवदारु, वचा, नागरमोथा, अतिविषा एवं हरड़ का चूर्ण सुखोदक से पीना चाहिए।

- आम पुरीष का शूलसहित त्याग करने पर तो उपर्युक्त चूर्ण अनार के रस से व्यक्ति पीवे।

- बिल्व, चित्रक, नागर (सोंठ) एवं धनिया ये सब पृथक् पृथक् रूप से 5 ग्राम की मात्रा में लेकर इन्हें कूटकर क्राथ की विधि से क्राथ बनाकर वर्षा की ऋतु में स्वस्थ व्यक्ति भी वर्षाजनित दोष के निवारण एवं वारण के लिए 5 दिन तक पीवे।

- कलिङ्ग (इंद्रजौ), हिङ्गु, अतिविषा, वचा, काला नमक एवं हरड़ का चूर्ण 3 ग्राम की मात्रा में उष्ण जल से प्रतिदिन एक बार या दो बार 15 दिन तक पीता है वह वर्षा में स्वस्थ रहता है और पाण्डु-कामला-अतीसार- अर्शोरोग-ग्रहणीदोष एवं उदररोगों से ग्रस्त नहीं होता है ।

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७९०१४

प्रतिष्ठायाम्,